बालकथा

डॉ पूजा उपाध्याया



संस्कृतभारती
नवदेहली

बालकथा:

लेखिका

डॉ. पूजा उपाध्याया

संस्कृतभारती
नवदेहली

प्रकाशनम्
संस्कृतभारती
मातामन्दिरगली, झण्डेवालान
नवदेहली - 110055

प्रथममुद्रणम् - २०१३
मूल्यम् - रु. ४०/-
प्रतिकृतयः - १०००

मुद्रणम् - **प्रिन्टैक इन्टरनेशनल**
बी-36, डी.एस.आई.डी.सी. कॉम्प्लैक्स
झिलमिल इंडस्ट्रियल एरिया, दिल्ली-95

ISBN - 978-93-81160-80-0

BALAKATHAH

Stories for children by *Dr. Pooja Upadhyaya*

Publisher	-	Samskrita Bharati, Mata Mandir Gali, Jhandevalan, New Delhi - 110055 Tel - 011-23517689/ 23543097 samskritabharatidelhi@yahoo.co.in
Pages	-	56
Price	-	Rs. 40/-
First Print	-	Jan - 2013
Printed at	:	**Printech International** B-36, D.S.I.D.C. Complex, Jhilmil Industrial Area, Delhi-95

प्रायोजनम्

लक्ष्मीठाकुर

389, पॉकेट-सी, सैक्टर-ए
वसन्तकुञ्ज, नवदेहली-70

मनोगतम्

जीवनमूल्यान्येव भारतदेशस्य संस्कृतेः सारभूतानि वर्तन्ते। अस्माकं वैदिकऋषिभिः मनीषिभिः चिन्तकैश्च स्वजीवने प्रयोगं कृत्वा अनुभूतानि श्रेष्ठमूल्यानि अस्मभ्यं दत्तानि सन्ति। भारतीयसंस्कृत्यां श्रद्धावन्तः सर्वेऽपि जनाः ईहन्ते यत् तेषां बालकाः तानि जीवनमूल्यानि स्वजीवने आचरेयुः। समाजे तेषां बालकानां व्यक्तित्वं प्रेरकं प्रशंसितः भवेत्।

व्यक्तित्वस्य सर्वाङ्गीणविकासाय तेषां सामाजिकविकासः नैतिकविकासः आध्यात्मिकविकासश्च अपेक्ष्यते, तदर्थं बाल्यकालादेव गृहे कथामाध्यमेन वयं बालान् जीवनमूल्यानि शिक्षितुं शक्नुमः। तेभ्यः उत्तमसंस्कारान् दातुं शक्नुमः।

बालानां शिक्षणाय विविधेषु विधिषु कथाविधिः सर्वश्रेष्ठः मन्यते शिक्षाशास्त्रिभिः। बालमनसि यावत् प्रभावः कथानां भवति तावत् व्याख्यानानां नैव भवति। बाल्यकाले मम पितामहेन याः कथाः श्राविताः आसन् तासु बह्व्यः कथाः अद्यावधि मया स्मर्यते। स्वपुत्रौ कथां श्रावयितुं प्रतिदिनं मया एका नूतना कथा पठनीया रचनीया वा भवति अतः मया संस्कृतकथानां लघुपुस्तकलेखनस्य यत्नः कृतः। आशासे बालानां कृते एषः प्रयासः सार्थकः भविष्यति।

अस्मिन् कार्ये प्रत्यक्षं परोक्षं वा येषामपि सहायता मया अधिगता तान् सर्वान् प्रति हृदयेन कृतज्ञा अस्मि।

डॉ. पूजा उपाध्याया

(१)

मानव धर्मः

रङ्गाचार्यःयोगी महान् साधकः आसीत्। तस्य आश्रमे अनेके शिष्याः आसन्। सः स्वस्य शिष्यान् केवलं धर्मग्रन्थान् न पाठयति स्म अपि तु तस्य शिक्षणविधिः व्यावहारिकः आसीत्। शिष्याः मानवधर्ममाचरेयुः, समदर्शिनः भवेयुः ते नैतिकमूल्यानां केवलम् उपदेशमेव न दद्युः अपितु तथैव जीवनं यापयेयुः इति रङ्गाचार्यः ईहते स्म।

रङ्गाचार्यः वृद्धः जायमानः आसीत् सः सर्वश्रेष्ठशिष्याय आश्रमस्य दायित्वं दातुम् ऐच्छत्। रङ्गाचार्यस्य त्रयः शिष्याः कनकः भानुः जयश्च सर्वेषु बुद्धिमन्तः आसन्। तेषु श्रेष्ठस्य चयनार्थं आचार्यः तान् आहूय एकैकशः शतं शतं रूप्यकाणि आदाय आदिशत् यत् एतेन धनेन यः सर्वाधिकं पुण्यार्जनं करिष्यति स एव मम सर्वश्रेष्ठः शिष्यः भविष्यति। त्रयः त्वरितमेव आचार्यस्य चरणं स्पृष्ट्वा ततः अयान्।

जयेन चिन्तितं यत् शतरूप्यकैः अधिकाधिकं पुण्यार्जनाय राज्ञः साहाय्यं स्वीकरणीयम्। सः पञ्चरूप्यकाणि भाटकं दत्वा शकटेन राज्ञः नगरं प्राप्नोत्। सः राजानं न्यवेदयत् यत् प्रसिद्धस्य साधकस्य रङ्गाचार्यस्य शिष्योऽहम्। पुण्यार्जनाय प्रेषितोऽस्मि। मम पुण्यफले भवतः अपि भागः भवेत् अतः भवतः नगरे मन्दिरनिर्माणम् ईहते। रङ्गाचार्यस्य नाम संश्रूय राजा शीङ्घ्रमेव मन्दिरनिर्माणस्य आदेशम् अददात्।

द्वितीयः शिष्यः भानुः अचिन्तयत् यत् "आचार्यः सर्वदा शिवपूजने रतः भवति अतः यदि अहम् काशीं गत्वा विश्वनाथस्य प्रसादम् अनेष्यम् तर्हि आचार्यस्य कृते पुण्यस्य महान् विषयः भवेत्।" सर्वं विचिन्त्य भानुः काशीं गतः। तृतीयः शिष्यः कनकः यदा आश्रमात् किञ्चिद् दूरमेव आगतः तदा मार्गे एकं जनम् अपश्यत् यस्य शरीरे वस्त्रमपि पूर्णतया

नासीत् यथा च स बुभुक्षया आकुलः आसीत्। कनकः समीपस्थात् आपणात् भोजनं वस्त्रं च आनीय तस्मै बुभुक्षिताय अददात्। भोजनं प्राप्य सः बुभुक्षितः त्वरया स्वक्षुधाम् अशमयत्। भुक्त्वा तेन वस्त्रं धृतम्। सः कृतज्ञभावेन कनकम् अपश्यत्। कनकः एतेन कार्येण अतीव प्रसन्नचित्तः सन् मनसि दिव्यसन्तोषम् अनुभूय आश्रमं प्रत्यागच्छत्।

अतिशीघ्रम् आश्रमम् आगच्छन्तं कनकं दृष्ट्वा आचार्येण पृष्ठं यत् "किं भवान् परीक्षां दातुं न ईहते ?" तदा कनकः अवदत् यत् " आचार्य! क्षम्यताम्। अहं पुण्यस्य व्याख्यां कर्तुं न शक्नोमि किन्तु पुण्यं प्राप्य मनसि यथा सन्तोषः अनुभूयते तथैव अहम् अनुभवन् अस्मि। मार्गे क्षुधया आकुलितं दुर्बलं वस्त्रहीनं जनं दृष्ट्वा अहं अग्रे गन्तुं नाशकम्। अहं सर्वमपि धनं तस्य भोजनाय वस्त्राय च अददाम्। मया चिन्तितं यत् मम धनेन न्यूनातिन्यूनं तस्य अद्यतनी क्षुधा तु अपगमिष्यति अतः मया एतत् कार्यं कृतम्।" उत्तरं श्रुत्वा आचार्यः अतीव सन्तुष्टः दृश्यते स्म किन्तु मन्दं हसन् किमपि न अवदत्। कनकम् आश्रमकार्यार्थम् आदिशत्।

दशदिनानि अनन्तरं भानुः काशीतः प्रत्यागतः। तस्यापि यात्रावृतान्तं रङ्गाचार्येण श्रुतं किन्तु किमपि उत्तरं न अददात्। मासान्ते जयः मन्दिरनिर्माणकार्यं पूर्णं कारयित्वा आश्रमम् आगतः। मोदमानः जयः गौरवेण स्वस्य पुण्यार्जनयात्रायाः विवरणम् अश्रावयत्।

रङ्गाचार्यः सर्वान् शिष्यान् आह्वयत् सर्वान् अपृच्छत् च यत् त्रिषु शिष्येषु कः सर्वाधिकं पुण्यार्जनम् अकरोत्? बहवः शिष्याः जयं सर्वश्रेष्ठं मन्यन्ते स्म। मन्दं हसन् रङ्गाचार्यः अकथयत् भगवतः पुत्राः मरणासन्नाः सन्ति किन्तु वयं निर्जीवपाषाणाय धनस्य उपयोगं कुर्मः-किम् एतदेव धर्म इति भवन्तः अवगतवन्तः तर्हि मम शिक्षा निरर्थका जाता। अस्माकं

पूर्वजैः उक्तमस्ति यत्–

"न काष्ठे विद्यतेदेवो, न शिलायां न मृण्मये।
भावेषु विद्यतेदेवस्तस्माद् भावो हि कारणम्।।"

प्रत्येकस्मिन् जीवे तस्य ईश्वरस्य निवासः वर्तते। तेषाम् उपेक्षां कृत्वा मठमन्दिराणां निर्माणं तु निकृष्टं कार्यम् अस्ति। मठमन्दिराणां स्थानं मानवकल्याणात् अनन्तरम् उधिष्टं वर्तते ईश्वरः तु सर्वत्र सर्वस्मिन् वर्तते। केवलं काश्यां वा हरिद्वारे एव न लभते। उचितेषु कार्येषु उपयोगेन प्रस्तरेषु यथा अस्माकं श्रद्धाभावः भवति तथैव भगवतां निर्मितेषुसर्वेषु जीवेषु दयाभावः श्रद्धाभावः एव धर्मः। मानवधर्मस्याचरणमेव सर्वाधिकं पुण्यदायकं सन्तोषदायकं वर्तते अतः कनकः एव मम सर्वश्रेष्ठः शिष्यः।

(२)

सत्सङ्गतिः

कश्चन रामेश्वराचार्यः काश्यां निवसति स्म। सः विविधविद्यापारङ्गतः पण्डितः आसीत्। सः निर्धनबालकान् स्वगृहे निःशुल्कं पाठयति स्म। सः स्वशिष्यान् पुत्रवत् स्निह्यति स्म। शनैः शनैः सः वृद्धः रूग्णोऽपि जायमानः आसीत्। एकस्मिन् दिने तस्य बहु अस्वास्थ्यं जातम्। आचार्येण अनुभूतम् यत् तस्य अन्तिमकालः आगतः अस्ति। सः सर्वान् शिष्यान् समीपम् आह्वयत्। सर्वान् शिष्यान् दक्षिणहस्ते चन्दनचूर्णं वामहस्ते च कृष्णाङ्गारस्य ("कोयला" इत्यस्य) चूर्णम् आनेतुम् आदिशत्। सर्वेऽपि शिष्याः गुरोः आज्ञानुसारं कार्यम् अकुर्वन्।

पुनः आचार्येण उक्तं यत् ''एकस्मिन् कोणे सर्वमपि प्रक्षिप्य आगच्छन्तु"। सर्वेऽपि शिष्याः तथैव अकुर्वन। आचार्यः अपृच्छत् यत् "इदानीं भवतां हस्ते किम् अस्ति" ? तदा शिष्याः आश्चर्येण अवदन् "न किमपि"। शिष्याः चिन्तयन्तः आसन् यत् कदाचित् रुग्णावस्थायाम् आचार्यः विस्मरणशीलः जायमानः अस्ति।

आचार्येण यदा पुनः पुनः उक्तं यत्, "ध्यानेन पश्यन्तु, किमपि दृश्यते वा" ? तदा द्वित्राः शिष्याः अवदन् यत्, दक्षिणहस्ते तु किमपि न दृश्यते किन्तु वामहस्ते कृष्णकलङ्कः दृश्यते। इदानीं मन्दहासं कुर्वन् आचार्यः अकथयत् - "सर्वेऽपि दक्षिणहस्तं किञ्चित् जिघ्रन्तु।" सर्वे शिष्याः दक्षिणहस्तम् आघ्राय अवदन् यत् - ''एतस्मिन् हस्ते तु चन्दनस्य सुगन्धः वर्तते।

तदा आचार्यः सन्तुष्टः जातः। तेन उपदिष्टं यत्, सज्जनाः चन्दनमिव भवन्ति। समीपस्थाः भवन्ति तदा तु हितकारिणः भवन्त्येव किन्तु दूरे गच्छन्ति चेदपि तेषां सद्गुणानां प्रभावः अस्माकं जीवने दृश्यते। दुर्जनाः

तु कृष्णाङ्गार इव भवन्ति। एकं वारं संसर्गः भवति चेत् तेषां दुर्गुणानां चिह्नानि अस्माकं व्यक्तित्वे संश्लिष्टाः भवन्ति। अतः सर्वदा सज्जनानामेव सङ्गतिं कुर्वन्तु। एषा एव मम अन्तिमा शिक्षा वर्तते।

उक्तमपि वर्तते यत् -

"अहो दुर्जनसंसर्गान्मानहानिः पदे पदे।
पावको लौहसङ्गेन, मुद्गरैरभिहन्यते।।"
"काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम्।
तथा सत्सन्निधानेन, मूर्खो याति प्रवीणताम्।।"

(३)

ज्ञानात् शीलं विशिष्यते

सी.वी. रमणः नोबलपुरस्कारेणभूषितः प्रसिद्धः भौतिकशास्त्री आसीत्। एकवारं तस्य कार्यालये कार्यार्थं योग्यवैज्ञानिकानाम् आवश्यकता आसीत्। तेन समाचारपत्रेषु विज्ञापनं प्रकाशितम्। निर्धनताकारणात् योग्याः जनाः वञ्चिताः न भवेयुः तदर्थं साक्षात्कारार्थं गमनागमनस्य भाटकमपि कार्यालयपक्षतः लप्स्यते इत्यपि सूचना विज्ञापने प्रदत्ता। विज्ञापनं पठित्वा बहवः वैज्ञानिकाः साक्षात्कारार्थं तस्य कार्यालयं अगच्छन्।

तेषु वैज्ञानिकेषु रमणमहोदयेन केषाञ्चनानां वैज्ञानिकानां चयनं स्वविभागे कार्यार्थं कृतम्। येषां चयनं न अभवत् ते प्रतिप्रेषिताः। तेषु प्रतिप्रेषितेषु एकः युवकः साक्षात्कारसमाप्त्याः अनन्तरमपि कार्यालयात् बहिः अटन् आसीत्। यदा रमणमहोदयः बहिः आगतः तदा सः तं युवकम् अपश्यत्। तं दृष्ट्वा रमणमहोदयः कुद्धः जातः। रमणमहोदयः युवकम् आहूय अकथयत् यत् "भवान् साक्षात्कारे सफलः न अभवत्। भौतिकशास्त्रे भवतः ज्ञानम् अल्पम् अस्ति। परिणामं ज्ञात्वा अपि भवान् अत्र किमर्थं स्थितः अस्ति? अत्र अहं योग्यानामेव चयनं करोमि इदानीम् अत्र भवतः कृते स्थानं नास्ति।"

युवकः शान्तभावेन सर्वम् अशृणोत् अनन्तरं तेनोक्तं यत् - "माननीयमहोदय! भवान् कृपया क्रुद्धः न भवतु। साक्षात्कारे अन्येषां चयनविषये मम मनसि नास्ति कश्चिदपि सन्देहः। ये चिताः सन्ति ते निश्चयेन मम अपेक्षया श्रेष्ठाः स्युः। भवादृशस्य परीक्षकस्य विषये कोऽपि प्रश्नं कर्तुं न शक्नोति। अहं तु अन्यस्मात् कारणादेव अत्र स्थितः अस्मि। वस्तुतः भवता गमनागमनस्य यद् भाटकं दत्तं वर्तते तद् त्रुटिवशात् मह्यम् अधिकं प्रदत्तमस्ति अतः अहम् एतत् अतिरिक्तधनं

प्रत्यर्पयितुं कार्यालयलिपिकस्य कृते प्रतीक्षारतः अस्मि।"

तस्य युवकस्य कथनं संश्रुत्य रमणमहोदयः प्रसन्नतया अवदत् यत् "एतस्मिन् कार्यालये कार्यं कर्त्तुं भवतः चयनं जातमस्ति श्वः आरभ्य भवान् कार्यार्थम् आगच्छतु"। युवकेन आश्चर्यः प्रकटितः तदा रमणमहोदयेन उक्तं यत् चितेषु वैज्ञानिकेषु सर्वे ज्ञानवन्तः तु सन्ति किन्तु शीलवन्तः सन्ति न वा इति अहं न जानामि। यद्यपि भौतिकविषये भवतः ज्ञानम् अल्पं वर्तते तथापि अहं भवन्तं चिनोमि यतोऽहि भौतिकशास्त्रं तु अहं पाठयित्वा भवन्तमपि योग्यं कर्त्तुं शक्नोमि किन्तु यत् शीलं या नैतिकता भवतः व्यक्तित्वे अस्ति तद् एतस्मिन् संसारे दुर्लभा वर्तते तद् कोऽपि पाठयितुं न शक्नोति।

उक्तमपि शास्त्रेषु –

"शौचानां परमं शौचं, गुणानां परमो गुणः।
प्रभावो महिमा धाम, शीलमेकं जगत्त्रये।।"
"विदेशेषु धनं विद्या, व्यसनेषु धनं मतिः।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम्।।"

(४)

क्लिश्यन्ते लोभमोहिताः

आसीत् कश्चन मानपुरग्रामः। अत्यन्तनिर्धनः सः ग्रामः किन्तु तत्र लक्ष्मीधरः नामकः एको धनिकोऽपि आसीत्। स तु अति कृपणः लुब्धश्चासीत्। ग्रामजनाः तस्मादेव ऋणं स्वीकृत्य स्व जीवनं यापयन्ति स्म। लक्ष्मीधरस्य समीपे बहूनि दीर्घपात्राणि आसन्। ग्रामजनाः विवाहादिषु लक्ष्मीधरात् भाटकेन पात्राणि स्वीकुर्वन्ति स्म। लक्ष्मीधरः अत्यधिकं भाटकं स्वीकृत्य तान् पीडयति स्म किन्तु निर्धनतावशात् ग्रामजनानां लक्ष्मीधर एव आश्रयः आसीत्।

ग्रामे एकः बुद्धिमान् युवकः नन्दनः आसीत्। तस्य चतस्रः भगिन्यः आसन्। यदा नन्दनस्य ज्येष्ठायाः भगिन्याः विवाहः निश्चितः जातः तदा स पात्राणि स्वीकर्तुं लक्ष्मीधरस्य गृहम् अगच्छत्। नन्दनः लक्ष्मीधरम् अकथयत्, "महोदय मम भगिन्याः विवाहे भवतः दीर्घपात्राणि आवश्यकानि किन्तु कृपया भवान् अल्पभाटकेन ददातु यतोऽहि मम तु चतस्रः भगिन्यः वर्तन्ते।" तदा लक्ष्मीधरः क्रोधेन अवदत् यत्, "भवतः चतस्रः भगिन्यः सन्ति तस्मिन् नास्ति मम कोऽपि दोषः। बारम्बारम् उपयोगेन मम पात्राणि श्रान्तानि भवन्ति। अहं किमर्थम् अल्पभाटकं स्वीकृत्य स्वस्य हानिं करोमि"? नन्दनस्य प्रार्थना लक्ष्मीधरेण नाङ्गीकृता।

अन्ततः नन्दनेन पात्राणि स्वीकृतानि। मार्गे तेन एका योजना निर्मिता। भगिन्याः विवाहानन्तरं पात्राणां प्रत्यर्पणसमये नन्दनेन पञ्च पात्राणि अधिकानि दत्तानि तदा लक्ष्मीधरेण आश्चर्येणोक्तं यत् पात्राणि अधिकानि कथम् अभवन्? तदा नन्दनेन पूर्वयोजनानुसारं उक्तं यत् भवता दत्तेषु पात्रेषु कतिचन गर्भवन्ति आसन् अतः एतानि पात्राणि तेषां पुत्राः। एतेषु भवतः एव अधिकारः अतः भवान् स्वीकरोतु।

लक्ष्मीधरस्य मनसि लोभः जागरितः प्रसन्नता च जाता। सः सहर्षेण पात्राणि अस्वीकरोत्। एकः वर्षः अतीतः। नन्दनस्य द्वितीयभगिन्याः विवाहः निश्चितः जातः। पुनः स लक्ष्मीधरस्य समीपं पात्राणि स्वीकर्तुम् अगच्छत्। लक्ष्मीधरेण प्रसन्नो भूत्वा पात्राणि प्रदत्तानि। तेन चिन्तितम् एतस्मिन् वर्षे इतोऽपि अधिकानि पात्राणि एषः प्रत्यर्पयिष्यति इति। अतः तेन भाटकमपि किञ्चित् अल्पं कृतम्।

नन्दनोऽपि प्रसन्नः आसीत् यतोऽहि तस्य योजनायाः परिणामकालः आगतः आसीत्। विवाहस्य पञ्चदश दिनानि अतीतानि। नन्दनः

लक्ष्मीधरस्य पात्राणि प्रत्यर्पयितुं न गतः। प्रतीक्षारतः लक्ष्मीधरः स्वयमेव नन्दनस्य गृहं पात्राणि स्वीकर्तुम् अगच्छत्। यदा लक्ष्मीधरः पात्राणि अयाचत तदा नन्दनः अवदत् यत, "भवतां पात्राणां तु मृत्युः अभवत्। तेषु एकमपि जीवितं नास्ति।" क्रोधेन कम्पमानः लक्ष्मीधरः आक्रन्द्य ग्रामजनान् आह्वयत्। सर्वेषां पुरतः लक्ष्मीधरः नन्दनम् अवदत् यत्, "वदतु मिथ्यावादी नन्दन! पात्राणां मृत्युः कथं सम्भवति"? नन्दनः हसित्वा अकथयत् यत् यथा पात्राणां पुत्रादयः भवन्ति तथैव तेषां मृत्युः अपि जायते। सर्वे ग्रामजनाः अपि लक्ष्मीधरं दण्डयितुम् इच्छन्ति स्म अतः तेऽपि नन्दनस्य मतम् अङ्गीकृतवन्तः।

अन्ततः लक्ष्मीधरः अजानात् यत् एतत् सर्वमपि तस्य लोभस्य फलं वर्तते। अतएवोच्यते –

"अति लोभो न कर्त्तव्यो, लोभो नैव च नैव च।
अतिलोभाभिभूतात्मा, सागरः सागरं गतः।।"

(५)

यथा भावः तथा फलम्

एकस्मिन् नगरे एकः धनिकः व्यापारी सोमेश्वरः आसीत्। यावत् सः अर्जयति स्म तावदेव कृपणः जायमानः आसीत्। तस्य द्वारात् सर्वेऽपि याचकाः रिक्तहस्ताः एव गच्छन्ति स्म। एकस्मिन् दिवसे तस्य पुत्रस्य जन्मदिवसावसरे कश्चन सिद्धपुरुषः तस्य गृहं भिक्षां याचितुम् आगतः। तस्मिन् दिवसे प्रसन्नतायाः कारणात् सोमेश्वरेण एकं रूप्यकं तस्मै साधवे प्रदत्तम्। साधुना एकस्यां पुटिकायां सोमेश्वराय प्रसादं प्रदत्तम्। धनिकेन तत् प्रसादम् एकस्मिन् कोणे स्थापितम्। यदा सायंकाले सोमेश्वरेण सा प्रसादपुटिका क्षेप्तुम् उत्थापिता तदा तेन तस्यां पुटिकायाम् एकं स्वर्णमौक्तिकं दृष्टम्। सोमेश्वरः अतीव प्रसन्नो जातः। सः अचिन्तयत् यत् एतत् दानस्य फलमिति।

क्षणानन्तरमेव सोमेश्वरः दुःखितः जातः यत् अहं यदि अधिकं धनं तस्मै साधवे अदास्यं चेत् अधिकानि स्वर्णमौक्तिकानि अप्राप्स्यम्। तदा सः निश्चयम् अकरोत् यत् श्वः आरभ्य अधिकं दानं दास्यामि।

इदानीं प्रतिदिनं सोमेश्वरः याचकान् प्रतीक्षते स्म। त्रीणि दिनानि अनन्तरम् एकः साधुः सोमेश्वरस्य द्वारम् आगतः। मोदमानः सोमेश्वरः स्वर्णमौक्तिकानां लोभवशात् जीवने प्रथमबारं याचकाय सहस्ररूप्यकाणि अददात्। धनं दत्वा सोमेश्वरः साधोः स्वयमेव प्रसादम् अयाचत। सः श्रद्धया साधोः प्रसादं स्वीकृत्य अस्थापयत्। सायंकालस्य प्रतीक्षायां सः अत्यन्तः व्याकुलः आसीत्। यदा सूर्यास्तः जातः तदा सः झटिति प्रसादपुटिकाम् उद्घाट्य अपश्यत् किन्तु तत्र तु केवलं किञ्चित् मधुरखण्डम् आसीत्।

सः संक्रुध्य स्वकेशान् अकर्षत् उच्चैः अक्रन्दत् च। तत् श्रुत्वा तस्य

पत्नी समागता। सर्वमपि वृतान्तं ज्ञात्वा पत्न्या उक्तं यत् पूर्वं भवता दानभावनया एकं रूप्यकं दत्तम् आसीत्। द्वितीयवारं तु लोभभावेन रूप्यकाणि दत्तानि, अतः भावानुगुणं क्रियायाः फलं भवता प्राप्तम्। अतएवोच्यते सर्वदा उत्तमभावेन कार्यं सम्पादनीयम् इति। उक्तमपि वर्तते यत् –

"दानमिज्या तपः शौचं, तीर्थं वेदा श्रुतं तथा।
सर्वाण्येतानि तीर्थानि, यदि भावोऽस्ति निर्मलः।।"

(६)

यः क्रियावान् सः पण्डितः

गोपुर नामकः कश्चन अतिलघुग्रामः आसीत्। गोपुरग्रामस्य निर्धनकृषकः देवीदयालः बुद्धस्य महान् भक्तः आसीत्। गौतमबुद्धः ग्रामे – ग्रामे भ्रमन् उपदिशति स्म। एकदा बुद्धस्य उपदेशं श्रोतुं देवीदयालः समीपस्थं ग्रामम् अगच्छत्। उपदेशान्ते सः गौतमबुद्धं स्वग्रामे उपदेशार्थं न्यवेदयत्। गौतमबुद्धः आगामिदिवसे प्रभाते गोपुरग्रामम् आगन्तुम् अकथयत्।

देवीदयालः प्रसन्नो भूत्वा स्वग्रामम् आगत्य प्रतिगृहं बुद्धस्य आगमनस्य सूचनाम् अददात्। ग्रामजनाः अपि प्रसन्नाः जाताः। सम्पूर्णग्रामम् अटित्वा यदा सः स्वगृहं प्राप्नोत् तदा सः अपश्यत् यत् तस्य एकः वृषभः अत्यधिकः ज्वरपीडितः आसीत्। देवीदयालस्य गृहे तु गृहसदस्यरूपेण केवलं तस्य अतिप्रियौ द्वौ वृषभौ एव आस्ताम् अतः सः अविलम्बेन तं वृषभं नगरपशुचिकित्सालयम् अनयत्। सम्पूर्णरात्रौ देवीदयालः वृषभस्य सेवाम् अकरोत्। तस्य ग्रामे प्रातः काले गौतमबुद्धः उपदेशार्थम् आगतः। एकस्य वृक्षस्य अधः उपविश्य ते उपादिशन्। सर्वेऽपि ग्रामजनाः देवीदयालस्य निन्दां कुर्वन्तः आसन् यत् महात्मानं बुद्धम् आहूय देवीदयालः स्वयमेव अदृश्यः अस्ति। तस्य बुद्धवचने आस्था नास्ति सः निरर्थकं श्रद्धां प्रदर्शयति, एतादृशवार्ताः जनेषु जायमानाः आसन्।

यदा बुद्धस्य उपदेशः समाप्तः तदा सर्वे दृष्टवन्तः यत् दूरस्तात् देवीदयालः वृषभेण सह आगच्छन् अस्ति। देवीदयालः धावन् आगत्य बुद्धस्य चरणम् अस्पृशत्। तस्य अश्रूणि पतन्तः आसन् सः सर्वामपि वार्ताम् अश्रावयत्। तदा बुद्धेन प्रसन्नो भूत्वा उक्तं यत् सर्वेभ्यः प्राणिभ्यः मनसि दयाभावः भवेत्, कर्मप्राधान्यं भवेत् न तु केवलं उपदेशश्रवणे श्रद्धा भवेत् अपितु तस्य परिपालने इच्छाशक्तिः भवेत्

वस्तुतः भवन्तः सर्वे तु मम वचनानि केवलम् अश्रृण्वन् किन्तु देवीदयालस्तु तानि अपालयत् अतः मम एकं वचनं इतोऽपि श्रृण्वन्तु यत् यथा देवीदयालः मम वचनानां क्रियान्वितिम् अकरोत् तथैव भवन्तः सर्वेऽपि कुर्वन्तु इति। अस्माकं ग्रन्थेषु उक्तमपि वर्तते यत् –

"पठकः पाठकश्चैव ये चान्ये शास्त्रचिन्तकाः।
सर्वे व्यसनिनो ज्ञेया यः क्रियावान् सः पण्डितः।।"

(७)

मित्ररत्नम्

अवधेशः बहु प्रसन्नो आसीत्। सः दशमीकक्षायां प्रथमश्रेण्याम् उत्तीर्णः जातः आसीत्। सम्पूर्णग्वालियरनगरे सः प्रथमस्थानं प्राप्नोत्। अद्य देहल्याः विशालविद्यालये प्रवेशं प्राप्तुं सः पित्रा सह रेलयानेन गच्छन् आसीत्।

अवधेशः पठने उत्तमः आसीत् किन्तु सः अत्यधिकप्रदर्शनप्रियः अहङ्कारी चासीत् अतः तस्य पिता सर्वदा चिन्तितः भवति स्म। छात्रावासे कदाचित् अवधेशस्य व्यवहारे परिष्कारः भवेदिति अवधेशस्य पिता इदानीमपि चिन्तयन् आसीत्।

रेलयानम् आगरारेलस्थानकं प्राप्नोत्। ततः एकः बालकः स्वपित्रा सह अवधेशस्य समीपम् आगत्य उपाविशत्। सः वेशभूषया ग्रामीणः दृश्यते स्म। किञ्चित्कालानन्तरं मन्दं हसन् सः बालकः अहं विनयः इत्युक्त्वा अवधेशेन सह परिचयं सम्पादयितुम् अयतत। किन्तु अवधेशः अहङ्कारवशात् स्वमुखं वातायनदिशि अकरोत्। केनापि ग्रामीणनिर्धनबालकेन सह वार्तां कर्तुम् अवधेशस्य काऽपि इच्छा नासीत्। अवधेशस्य प्रकृतिं जानन् तस्य पित्रा शीङ्घ्रमेव ताभ्यां सहयात्रिभ्यां सह वार्ता आरब्धा। चर्चायां सः अजानात् यत् तौ अपि तस्मिन्नैव विद्यालये विनयस्य प्रवेशार्थं गच्छन्तौ स्तः।

एतत् श्रुत्वा अवधेशस्य पिता तु अहृष्यत् किन्तु अवधेशः हीनभावनया विनयम् अपश्यत्। विनयस्य पित्रा उक्तं यत्, "वयं तु निर्धनकृषकाः स्मः। मम पुत्रोऽपि मम साहाय्यं कुर्वन् परिश्रमेण पठति। सर्वकारस्य विशिष्टछात्रवृत्तियोजनायाम् एतस्य चयनं देहल्याः विद्यालये प्रवेशार्थं जातं वर्तते।" अवधेशस्य पिता विनयात् प्रभावितो भूत्वा तस्य प्रशंसाम्

अकारोत्। स्वपितुः मुखात् विनयस्य प्रशंसां श्रुत्वा अवधेशः बहु क्रुध्यन् आसीत्।

देहलीं प्राप्य ते सर्वे सहैव विद्यालयम् अगच्छन्। प्रवेशपूर्वपरीक्षायाम् अवधेशविनयौ उत्तीर्णौ जातौ। द्वयोः बालकयोः विद्यालये प्रवेशः सञ्जातः। छात्रावासेऽपि एकस्मिन् प्रकोष्ठे एव तयोः प्रवेशः जातः। द्वयोः जनकौ प्रसन्नौ भूत्वा प्रत्यागतवन्तौ किन्तु अवधेशः खिन्नः आसीत्। अवधेशः न केवलं विनयाय ईर्ष्यति स्म अपितु सर्वदा विनयस्य अपमानं करोति स्म। विनयः अवधेशस्य दुर्व्यवहारस्य कारणं ज्ञातुं न अशक्नोत् किन्तु सः सर्वदा अवधेशेन सह प्रेम्णा व्यवहरति स्म। यद्यपि विनयः अवधेशस्य प्रकोष्ठसहभागी आसीत् तथापि अवधेशः स्वमित्रेषु तस्य गणनां न करोति स्म। केचन धनिकपुत्राः अवधेशस्य मित्राणि आसन्। कदाचित् निर्धनतायाः कारणात् अवधेशः मया सह वार्तां न करोति इत्येव विचिन्त्य विनयः शान्त्या पठने रतः भवति स्म।

शनैः-शनैः कतिचन मासाः अतीताः। विजयादशम्यां विद्यालये दशदिनानाम् अवकाशः घोषितः। सर्वेऽपि बालकाः स्वगृहं गन्तुं सिद्धाः आसन्। शनैः-शनैः छात्रावासः रिक्तः जायमानः आसीत्। विनयोऽपि स्ववस्तूनि यानपेटिकायां स्थापयन् आसीत्, तदा सः अवधेशम् अपश्यत् स तु आच्छाद्य स्वपर्यङ्के शयानः आसीत्। विनयेन समीपं गत्वा दृष्टं यत् अवधेशः अत्यधिकज्वर पीडितः आसीत् तदा सः अनुक्षणं धावित्वा औषधम् आनीय तस्मै अददात्। अवधेशः विनयम् अवदत् यत् ''भवान् स्वगृहं गच्छतु। अहमपि श्वः स्वस्थो भूत्वा गमिष्यामि इति'' तदा विनयेनोक्तं यत् "अहं भवन्तम् एतस्यां स्थितौ त्यक्त्वा नैव गमिष्यामि यतोऽहि सम्पूर्ण छात्रावासे मां विहाय अन्य छात्रः नास्ति।"

अवधेशस्य सर्वाण्यपि मित्राणि तम् अदृष्ट्वा एव स्वगृहम् अगच्छन्

इति ज्ञात्वा अवधेशः व्यथते स्म। सम्पूर्णरात्रौ विनयः अवधेशस्य परिचर्याम् अकरोत्। विनयः प्रभाते अवधेशस्य वस्तूनि स्वीकृत्य तमपि रेलस्थानकम् अनयत्। यद्यपि विनयस्य गृहं तु आगरानगरस्य समीपे एकस्मिन् ग्रामे आसीत् तथापि सः स्वस्य अस्वस्थं मित्रं प्रापयितुं ग्वालियरम् अगच्छत्। अवधेशस्य गृहजनाः विनयं प्रति बहु कृतज्ञाः आसन्। तेन सह मिलित्वा सर्वेऽपि प्रसन्नाः जाताः। सायंकाले विनयः स्वग्रामम् अयात्।

सम्पूर्णरात्रौ अवधेशः विनयस्य विषये चिन्तयन् आसीत्। विनयं प्रति स्वव्यवहारं विचिन्त्य तस्य मनसि ग्लानिः भवति स्म। प्रभाते अवधेशस्य पिता तम् अपृच्छत् यत्, "विजयादशम्याः अवसरे भवते किम् उपहारम् आवश्यकम् ?"

तदा अवधेशः पितरम् अवदत् यत् "एतस्मिन् पर्वणि अहम् अमूल्यम् उपहारं अलभे मित्ररत्नमिति।" पिता अपि अजानात् यत् एतस्यां विजयादशम्यां पुनरेकवारं सद्व्यवहारात् अहङ्कारः पराजितः इति।

उक्तमपि वर्तते –

"आपत्काले तु सम्प्राप्ते, यन्मित्रं मित्रमेव तत्।
वृद्धिकाले तु सम्प्राप्ते, दुर्जनोऽपि सुहृद् भवेत्।।"

(८)

सन्तोषः परमं सुखम्

गुरुनानकदेवस्य प्रवचनं श्रोतुं प्रतिदिनं एकः धनिकः गच्छति स्म। एकस्मिन् दिने सः गुरुनानकदेवं स्वगृहे भोजनार्थं न्यवेदयत्। तेनोक्तं यत्, "मम पत्नी भवतः भक्ता अस्ति तस्याः बहु इच्छा अस्ति यत् तया निर्मितं भोजनं भवान् करोतु इति"। गुरुनानक देवेन उक्तं यत्, "मम तु साधारणं भोजनं कर्तुमेव सामर्थ्यं वर्तते अतः अहम् आगन्तुम् असमर्थोऽस्मि। धनिकेन बहु निवेदितम् तदा गुरुनानकेन चिन्तितं यत् एषः कदाचित् स्वस्य ऐश्वर्यं दर्शयितुम् ईहते अतः तेन आगन्तुं सहमतिः प्रकटिता।"

द्वितीये दिने यदा गुरुनानकः तस्य गृहम् अगच्छत् तदा तत्र उत्सवः इव वातावरणं दृश्यते स्म। धनिकस्य गृहे सप्तध्वजान् दृष्ट्वा गुरुनानकस्य मनसि प्रश्नः उदितः। तस्य गृहम् अतिविशालं सुन्दरं च आसीत्। भोजनार्थं विविधप्रकारकानि खाद्यानि आसन्। गुरुनानकेन उक्तं यत् "अहं तु केवलं फलमेव खादिष्यामि तदा धनिकः अनुक्षणमेव बहूनि फलानि अनयत्।" तेनोक्तं यत्, एतानि सेवफलानि कश्मीरस्य सन्ति एतानि आम्रफलानि उत्तरप्रदेशस्य सन्ति। एतादृशप्रदर्शनपरकवाक्यानि सः वदन् आसीत्।

फलानि खादित्वा गुरुनानकेन पृष्टं यत्, भवतः गृहद्वारे सप्तध्वजाः किमर्थं सन्ति? धनिकः अहङ्कारेण अवदत् यत्, "एकः ध्वजः एक कोटिरुप्यकाणां प्रतिनिधिः अस्ति। अहं सप्तकोट्यधिपतिः अस्मि इति सूचयन्ति एते सप्तध्वजाः" तदा गुरुनानकः अवदत् यत्, "भवतः समीपे तु बहु सम्पत्तिः वर्तते तर्हि इदानीं तु भवतः काऽपि चिन्ता न स्यात्।" तदा धनिकः अवदत् "वस्तुतः चिन्ताकारणात् मम

निद्रा एव न भवति। नगरे अन्य धनिकानां गृहे तु एकादशद्वादशध्वजाः अपि वर्तन्ते किन्तु बहोः कालात् मम ध्वजेषु वृद्धिः न जायमाना वर्तते। भवान् एव मह्यं आशीर्वादं ददातु येन मम चिन्ता समाप्ता भवेत्।" गुरुनानकेन स्ववस्त्रात् एका सूचिका निष्कास्य धनिकाय दत्ता। उक्तं च – "मम आशीर्वादः भवति अस्ति। एनां सूचिका भवान् स्थापयतु किन्तु आगामि जन्मनि मह्यं अवश्यमेव प्रत्यर्पयतु" इति।

मोदमानः धनिकः अचिन्तयित्वा अनुक्षणमेव अकथयत् 'अवश्यम् अवश्यम्, अहं निश्चयेन प्रदास्यामि' इति। मन्दं हसन् गुरुनानकः तस्य गृहात् प्रस्थितः।

गुरुनानकस्य गमनानन्तरं तस्य पत्नी अवदत् यत् ''भवान् एनां सूचिकां आगामिजन्मनि कथं गुरुनानकाय दास्यति? किं मरणसमये वयं किमपि नेतुं शक्नुमः?" तत्क्षणमेव धनिकः धावन् गुरुनानकदेवस्य समीपं गत्वा अवदत् यत् – "भवान् स्वस्य सूचिकाम् इदानीमेव स्वीकरोतु यतोऽहि अहं मरणसमये कथम् एतां नेतुं शक्ष्यामि?"

तदा हसित्वा गुरुनानकेन उक्तं यत् "भवान् एकां सूचिकामपि आगामिजन्मनि नेतुं न शक्नोति तर्हि सप्तकोटिरूप्यकाणि कथं नेष्यति ?" तदा धनिकस्य नेत्रयोः अश्रूणि आगतानि सः गुरुनानकस्य चरणं स्पृष्ट्वा अवदत् यत् अद्य मम सर्वाः चिन्ताः समाप्ताः। मम जीवनस्य मार्गदर्शनं करोतु इति।

गुरुनानकेन तस्य शिरसि हस्तं संस्थाप्य उक्तं यत् ''जीवने सन्तोषः बहु आवश्यकः। भवता प्रभूतं धनं सम्पादितं वर्तते इदानीं तत् धनं निर्धनानां बुभुक्षितानां विकलाङ्गानां च कृते दानाय उपयोगं करोतु। तेषां आशीर्वादाः आगामि जन्मनि अपि भवता सह भविष्यन्ति।"

धनिकेन अद्य जीवनस्य लक्ष्यं प्राप्तम् आसीत्।

उक्तमपि वर्तते -

"अन्तो नास्ति पिपासायाः, सन्तोषः परमं सुखम्।
तस्मात्सन्तोषमेवेह, परं पश्यन्ति पण्डिताः।।"
"अकिञ्चनस्य दान्तस्य, शान्तस्य समचेतसः।
सदा सन्तुष्टमनसः, सर्वाः सुखमयाः दिशः।।"

(६)

सौन्दर्यम्

लावण्या सर्वदा आत्ममुग्धा भवति स्म। तस्याः स्वसौन्दर्ये बहु - अभिमानः आसीत्। सा केवलं सुन्दरजनैः सहैव मित्रतां करोति स्म। कुरूपजनेषु तस्याः घृणाभावः भवति स्म। एकस्मिन् दिने तस्याः कक्षायाम् एकस्याः नूतनायाः ग्रामीणबालिकायाः प्रवेशः जातः। तस्याः नाम पवित्रा आसीत्। पवित्रा दशमीकक्षायां जिलाप्रावीण्यसूच्यां प्रथमस्थानम् प्राप्नोत् अतः विद्यालयस्य विशिष्ट छात्रवृत्ति-योजनान्तर्गतं पवित्रायाः प्रवेशः जातः आसीत्।

अद्य सर्वाः अपि बालिकाः पवित्रां परितः आसन्। सर्वाः अपि तया सह मित्रतां कर्तुमिच्छन्त्यः आसन् यतोऽहि सा पठने उत्तमा आसीत्। लावण्या घृणया दूरस्तात् पवित्रां पश्यन्ती आसीत् यतोऽहि पवित्रा कृष्णवर्णीया अत्यन्त सामान्य बालिका आसीत् तस्याः केशेषु अत्यधिकं तैलं दृष्ट्वा लावण्या छिः इति शब्दं कृत्वा कक्षातः बहिः गता।

लावण्या यतोऽहि अत्यन्तधनिका आसीत् अतः तस्याः काश्चन चाटुकाराः सख्यः आसन्। ताः अपि पवित्रां त्यक्त्वा लावण्यायाः पृष्ठे पृष्ठे आगताः। लावण्या क्रोधेन ईर्ष्यया च ताः अवदत् यत्, "भवत्यः यदि मम सख्यः सन्ति चेत् कदापि तया मलिनया बालिकया सह वार्तां न करिष्यन्ति इति।" ताः चाटुकाराः बालिकाः लावण्यायाः वचनम् अङ्गीकृतवत्यः।

लावण्या यदा कक्षां पुनरागता तदा तया सह परिचयार्थं पवित्रा तस्याः समीपम् अगच्छत् पवित्रा यदा हस्तमेलनार्थम् ऐच्छत् तदा लावण्या घृणितभावेन अवदत् यत्, "अहं भवत्या सह परिचयं नेच्छामि यतोऽहि भवती मम अनुगुणं नास्ति।" पवित्रा विस्मिता अभवत्। सा न अजानात्

यत् मयि के दुर्गुणाः सन्ति यत् लावण्या मया सह मित्रतां कर्तुम् नेच्छति। एतत् सर्वमपि विचिन्तयन्ती पवित्रा स्वगृहम् आगता।

लावण्या तस्याः सख्यः च प्रतिदिनं कथञ्चिदपि पवित्रायाः उपहासं कुर्वन्ति स्म। पवित्रा तूष्णीं भूत्वा सर्वमपि सहते। मासिक परीक्षायां, विद्यालयस्य अन्यगतिविधिषु पवित्रायाः प्रदर्शनम् अत्युत्कृष्टम् आसीत्। एतत् सर्वमपि दृष्ट्वा लावण्या ईर्ष्यति स्म।

एकस्मिन् दिने एका दुर्घटना जाता। लावण्यायाः शरीरे उष्णं दुग्धं पतितम्। तस्याः मुखे शरीरे च दीर्घपिटकाः जाताः। षड् सप्त दिनानि सा विद्यालयं न गता। तस्याः सख्यः सूचनां दत्तवत्यः यत् लावण्या दग्धा जाता। लावण्या यदा आत्मानं दर्पणे अपश्यत् तदा बहु अरोदीत्। सा विद्यालयं गन्तुं सिद्धा एव न आसीत्। तदा तस्याः माता स्नेहेन अवदत् यत् सौन्दर्यं तु हृदये भवति। मनुष्यः सद्गुणैः सुन्दरः भवति न तु शरीरेण। भवती बाह्यसौन्दर्यस्य कृते किमर्थं रोदिति ? तदा लावण्यया दुःखेन उक्तं यत् यस्य शरीरमेव घृणास्पदं भवति तर्हि आन्तरिकसौन्दर्यस्य किं प्रयोजनम् ? मात्रा उक्तं यत् ''इदानीं भवती बालिका अस्ति किञ्चित् ज्येष्ठा यदा भविष्यति तदा स्वयमेव मम वचनस्यार्थं ज्ञास्यति।'' एतत् सर्वं बोधयित्वा यथाकथञ्चित् माता तां विद्यालयं प्रेषितवती।

लावण्या यदा कक्षां प्रविष्टा तदा तस्याः सख्यः दूरं गत्वा उपविष्टवत्यः। घृणितभावेन सर्वाः पश्यन्त्यः आसन् तदा लावण्यया रोदनं आरब्धम्। तदा पवित्रा स्वस्थानात् उत्थाय लावण्यायाः समीपं गत्वा उपाविशत्। तस्याः दक्षिणहस्तः ज्वलितः आसीत् अतः सा लेखितुमपि असमर्था आसीत् तदा पवित्रा तस्याः टिप्पणी पुस्तिकायामपि अलिखत्। भोजनावकाशे पवित्रा लावण्यामपि स्वहस्तेन भोजितवती। अद्य लावण्या अत्यन्तग्लानिम् अनुभवन्ती आसीत्।

अवकाशसमये लावण्या पवित्रायाः आलिङ्गनं कृत्वा अवदत् यत् अद्य मया ज्ञातं यत् "अहं भवत्याः अनुगुणं नास्मि। भवती मदपेक्षया अतिसुन्दरी अस्ति यतोहि भवत्याः हृदयं सुन्दरं वर्तते। अद्य मम शारीरिकसौन्दर्यस्य अभिमानं नष्टं अभवत् कदाचित् तदर्थमेव ईश्वरेण एतत् फलं दत्तं वर्तते।" लावण्या अवेत् यत् वास्तविकसौन्दर्यं तु आन्तरिकमेव भवति। सद्गुणाः एव व्यक्तित्वस्य सौन्दर्यवर्धकाः भवन्ति। इदानीं पवित्रा लावण्या च घनिष्ठसख्यौ जातौ। अतएवोच्यते -

"शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम्।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः।।"

(१०)

पुरूषकारमनुवर्तते दैवम्

विनायकः अद्य बहु चिन्तितः आसीत् यतोहि सूचनापट्टे तेषां बालकानां नाम्नां सूची आसीत् ये विद्यालयस्य शुल्कं न अददुः। तस्यां सूच्यां विनायकस्यापि नाम आसीत्। विनायकः बुद्धिमान् बालकः आसीत् किन्तु सः निर्धनः आसीत्। विनायकस्य पिता कुम्भकारः आसीत्। सः प्रतिदिनं ङ्गाटान् निर्मीय विक्रीणाति स्म किन्तु पञ्चदशदिवसेभ्यः सः रुग्णः आसीत् अतः विनायकस्य विद्यालय शुल्कं दातुं न अशक्नोत्।

विनायकः षोडशवर्षीयः आसीत् अतः विनायकस्य पिता बहुवारं विनायकं घटनिर्माणं शिक्षितुम् ऐच्छत् किन्तु विनायकः सर्वदा वदति स्म यत् "अहं कदापि एतत् लघुकार्यं न करिष्यामि। अहं तु पठित्वा अधिकारी भविष्यामि।" यद्यपि तस्य पितरौ अपि तथैव ऐच्छतां तथापि तयोः चिन्ता भवति स्म यत् विनायकः यथार्थस्थितिम् अदृष्ट्वा केवलं स्वप्नं पश्यति।

अद्य विद्यालयप्रशासनेनोक्तं यत् ये शुल्कं न दास्यन्ति ते परीक्षार्थम् अनर्हाः भविष्यन्ति। विनायकः हताशो भूत्वा विद्यालयप्राङ्गणे रुदन् आसीत्। पृष्टतः तस्य मित्रम् सर्वेशः आगत्य रोदनस्य कारणम् अपृच्छत्। विनायकः अवदत् यत् "मम दुर्भाग्यं वर्तते यत् मम जन्म कुम्भकारस्य गृहे अभवत्। निर्धनतावशात् अहम् अग्रे पठितुमेव न शक्ष्यामि।" सर्वेशस्य पिता तु अधिकारी आसीत् चेदपि सः अत्यधिकः उदारः सरलः विनम्रः चासीत्। सः विनायकं स्वगृहम् अनयत्। स्वमातरं विनायकस्य समस्याम् असूचयत्। सर्वेशस्य माता सहृदया आसीत्। सा विनायकाय विद्यालयस्य शुल्कम् अददात्। सर्वेशस्य मातुः स्नेहवशात् विनायकः सङ्कोचेन शुल्कम् स्वीकरोत्। सः किमपि प्रत्युत्तरं दातुमपि न अशक्नोत्।

बहिः आगत्य सः सर्वेशम् अवदत् यत् सः शीघ्रमेव तत् धनं प्रत्यर्पयिष्यति इति। तौ वार्तारतौ एव आस्ताम् तदा सर्वेशस्य माता अन्तस्तात् सर्वेशम् उद्यानकार्यं समापयितुम् आदिशत्। तत् संश्रुत्य विनायकः अब्रवीत् यत् "भवतः गृहे तु बहवः सेवकाः वर्तन्ते तर्हि भवान् किमर्थम् एतत् लघुकार्यं करोति?" तदा सर्वेशः अकथयत्, मित्र! मम माता वदति यत् मम पितामहः कृषकः अस्ति। मम पिता अपि कृषिकार्यं कुर्वन्नैव स्वस्य अध्ययनम् अकरोत्। तेन वस्तुतः पुरुषार्थेन स्वभाग्यं परिवर्तितम्। मातुः कथनं वर्तते यत् न्यूनातिन्यूनम् उद्यानकार्यं मया करणीयं तेन पूर्वजैः कृत-परिश्रमस्य ममापि अनुभवः भवेत् तथा च एतदपि एकं कौशलं वर्तते किमपि कार्यं लङ्गु न भवति। मम पितुः एकं कथनं वर्तते यत् - "स्वप्नं पश्यतु किन्तु भविष्यस्य स्वप्नस्य मार्गः वर्त्तमानादेव गच्छति। अतः मम पिता स्वस्य वर्त्तमानात् संङ्गार्षं कृत्वा अद्य अधिकारी जातः।" प्रवर्तमानां चर्चां समाप्य विनायकः स्वगृहम् अयात्। मार्गे सः स्वस्य चिन्तनस्य विश्लेषणं कुर्वन् आसीत्। गृहे रुग्णं पितरं संदृश्य तेन मनसि एकः निर्णयः कृतः।

द्वितीयदिने प्रातः काले शीघ्रमुत्थाय विनायकः घटनिर्माणम् अयतत। तस्य पितरौ आश्चर्यचकितौ जातौ। तस्य माता अपि बहिः आगत्य तस्य साहाय्यम् अकरोत्। दशदिवसाभ्यन्तरे विनायकः घटनिर्माणम् अजानात्। इदानीं स प्रतिदिनं विद्यालयात् आगत्य घटान् विक्रीणाति स्म। विनायकेन क्रियमाणं परिश्रमं दृष्ट्वा तस्य पिता अतीव प्रसन्नः जातः।

मासद्वयानन्तरं विनायकः सर्वेशस्य गृहं धनं प्रत्यर्पयितुम् अगच्छत्। सर्वेशस्य माता विनायकम् अपृच्छात् यत्, "भवतः पितुः स्वास्थ्यं तु समीचीनं न जातं तर्हि भवान् एतत् धनं कुतः अलभत?"

तदा गौखेण विनायकः अवदत् यत् "अहं कुम्भकारस्य पुत्रः अस्मि

किन्तु अहं मम पितुः कौशलस्य मूल्यं न जानामि स्म। अहं हीनदृष्ट्या तत् कार्यं पश्यामि स्म किन्तु सर्वेशेन मम चिन्तनदिशा एव परिवर्तिता परिष्कृता च। मया स्वयं घटान् निर्मीय विक्रीय च एतत् धनम् अर्जितम् अस्ति। अद्य मया ज्ञातं वर्तते यत् मनुष्यः स्वयमेव स्वस्य भाग्यनिर्माता भवति, तदर्थं केवलं स्वप्नदर्शनम् न अपितु पुरुषार्थः करणीयः भवति।"

एतदुक्त्वा विनायकेन धनं सर्वेशस्य मातुः हस्ते दत्तम्। सर्वेशस्य मात्रा तद्धनं पुनः सर्वेशाय दत्वा उक्तं यत् "मम पुत्रस्य कारणात् भवतः दृष्टिकोणः परिमार्जितः जातः तदेव मम कृते आनन्ददायकः वर्तते। एतत् धनं भवान् उपहाररूपेण स्थापयतु किन्तु सर्वदा पुरुषार्थे विश्वासं करोतु।"

मोदमाना माता स्वपुत्रं पश्यन्ती चिन्तयन्ती आसीत् यत् अद्य तया दत्ताः संस्काराः फलीभूताः इति।

विद्वद्भिः उक्तमपि अस्ति यत् -

"यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम्।
तथा पुरुषकारेण विना दैवं न सिध्यति।।"

(११)

परोपकारार्थमिदं शरीरम्

नन्दिता परिश्रमिणी बालिका आसीत्। सा स्वपित्रा सह प्रतिदिनं शाकं विक्रीय विद्यालयं गच्छति स्म। अद्य तस्याः द्वादशीकक्षायाः अन्तिमप्रश्नपत्रस्य गणितस्य परीक्षा आसीत्। शाकापणात् शीघ्रं स्वगृहम् आगत्य स्वस्य सखिभिः सह द्विचक्रिकां स्वीकृत्य नन्दिता विद्यालयं गच्छन्ती आसीत्। प्रश्नपत्रारम्भे अर्द्धघण्टात्मकः समयः एव आसीत् अतः सा वेगेन द्विचक्रिकां चालयन्ती स्वेदसिक्ता गच्छन्ती आसीत्।

मुख्यमार्गं यदा सा आगता तदा सा मार्गस्य पार्श्वे एकां हस्तोत्तोलयन्तीं रक्तरञ्जितां महिलाम् अपश्यत्। बहवः जनाः गच्छन्तः आसन् किन्तु केऽपि तां दृष्ट्वा न तिष्ठन्ति स्म। नन्दिता द्विचक्रिकायाः अवतीर्य तस्याः महिलायाःसमीपम् अगच्छत्। नन्दितया दृष्टं यत् तस्याः शरीरात् वेगेन रक्तं स्रवत् अस्ति सा मूर्च्छिता जायमाना अस्ति। नन्दितायाः मनसि द्वन्द्वः आरब्धः यत् "एतां चिकित्सालयं नयामि चेत् अहम् परीक्षां दातुं न शक्ष्यामि। परिश्रमेण कष्टेन च मम पिता मां पाठयन् अस्ति अतः सः निराशः भविष्यति किन्तु एषा महिला यदि म्रियते तर्हि मम मनसि सम्पूर्णजीवने खेदः भवेत्। मम पिता अपि दुःखितः भवेत्। यतोहि सः सर्वदा लाभहानिम् अदृष्ट्वा अन्येषां साहाय्यं कर्तुं मां प्रेरयति। अस्तु अहं पूर्वं एतां महिलां चिकित्सालयं नयामि अनन्तरं परीक्षाविषये चिन्तयामि।" नन्दितायाः सख्यः अवदन् यत् एतां महिलां त्यक्त्वा वयं शीघ्रं परीक्षार्थं चलामः नो चेत् अनुत्तीर्णाः भविष्यामः किन्तु नन्दिता ता अपि महिलायाः साहाय्यं कर्तुम् अवदत्। नन्दितायाः सख्यः नन्दितां तत्रैव त्यक्त्वा विद्यालयम् अगच्छन्।

नन्दिता शीघ्रं द्विचक्रिकायां तालकं कृत्वा मुख्यमार्गम् आगत्य वाहनं

रोद्धुम् अयतत। दशनिमेषाः अतीताः केऽपि न तिष्ठन्ति स्म नन्दिता किमपि विचिन्त्य शीघ्रं शाकापणं गत्वा स्वपितरं सर्वम् असूचयत्। शाकानि स्यूते संस्थाप्य द्वौ स्वस्य हस्तशकटं स्वीकृत्य महिलायाः समीपम् अगच्छताम्। हस्तशकटेन तां महिलां शीघ्रं समीपस्थं चिकित्सालयम् अनयताम्।

चिकित्सकं सर्वं सूचयित्वा नन्दिता पुनः शाकापणात् स्वस्य द्विचक्रिकां स्वीकृत्य शीघ्रं विद्यालयम् अगच्छत्। परीक्षायाः एका होरा अतीता आसीत्। नन्दिता प्रधानाचार्यं सर्वमपि वृतान्तम् असूचयत्। नन्दितायाः वस्त्रेषु रक्तं दृष्ट्वा प्रधानाचार्यस्य यद्यपि विश्वासः जातः तथापि सः चिकित्सालये दूरवाण्या अपृच्छत्। सर्वं विज्ञाय प्रधानाचार्येण पृष्टं यत् "किं भवती घण्टाद्वये प्रश्नपत्रं लिखित्वा उत्तीर्णां भवितुं शक्ष्यति" ? नन्दितया आत्मविश्वासेन 'आम्' इत्युक्तम्।

नन्दिता मम विद्यालयस्य छात्रा इति विचिन्त्य प्रधानाचार्योऽपि मनसि गौरवम् अनुभवन् आसीत्। परीक्षान्ते नन्दितायाः सख्यः तस्याः उपहासं कुर्वत्यः वदन्त्यः आसन् यत् एषा मूर्खा अनुत्तीर्णा भूत्वा समाजसेवामेव करिष्यति।

सर्वं संश्रुत्य अपि नन्दिता किमपि न अवदत्। शीघ्रं द्विचक्रिकया सा चिकित्सालयं तां महिलां द्रष्टुम् अगच्छत्। सायंकाले चेतनावस्थायां सा चिकित्सकं सर्वम् असूचयत् यत् कथं कारयानस्य घट्टनेन एषा दुर्घटना जाता। नन्दितायाः विषये ज्ञात्वा सा नन्दितायै आशीर्वादम् अददात्। नन्दिता सन्तोषम् अनुभवन्ती गृहम् अगच्छत्।

कतिचन दिनानि अनन्तरं द्वादशीकक्षायाः परीक्षाफलं विद्यालयेन घोषितम्। नन्दिता द्वितीयश्रेण्याम् उत्तीर्णा जाता। विद्यालये आयोजिते प्रमाणपत्रवितरणसमारोहे नन्दितायाः परिवारमपि प्रधानाचार्यः आह्वयत्।

नन्दितायाः पितरौ तु निरक्षरौ आस्ताम्। तौ प्रथमवारं विद्यालयम् अगच्छताम्। समारोहे प्रधानाचार्यः अभाषत् यत्, "यद्यपि द्वादशीकक्षायाः परीक्षायां नन्दिता द्वितीयश्रेण्याम् उत्तीर्णा जाता किन्तु सा जीवनपरीक्षायां प्रथमश्रेण्याम् उत्तीर्णा वर्तते यतोहि पूर्वजैः उक्तम् अस्ति यत्" परं परोपकारार्थं यो जीवति स जीवति। "अतः नन्दिता 'विशिष्टछात्रापुरस्कारेण' अलङ्क्रियते तथा च तस्यै अग्रे महाविद्यालये पठनार्थं छात्रवृत्तिरपि दास्यते।"

एतत् श्रुत्वा नन्दितायाः पितुः नेत्रयोः अश्रूणि आगतानि। मोदमाना नन्दिता पुरस्कारम् स्वीकृतवती। नन्दितायाः सख्यः लज्जिताः आसन्। अद्य तासामपि बोधः जातः यत् -

"परोपकारः कर्त्तव्यः, प्राणैरपि धनैरपि।
परोपकारजं पुण्यं, न स्यात्क्रतुशतैरपि।।"

(१२)

आत्मवत् सर्वभूतेषु

ग्रीष्मावकाशे वीरेशः स्वमातुलस्य गृहम् अगच्छत्। तस्य मातुलः भूतपूर्वसैन्याधिकारी आसीत्। मातुलः भूशुण्डिचालने अत्यन्तः निपुणः आसीत्। वीरेशम् एकस्मिन् दिने सः भुशुण्डिचालनम् अशिक्षयत्। वीरेशः अति प्रसन्नः जातः।

मातुलेन वीरेशाय भुशुण्डिक्रीडनकं प्रदत्तम्। वीरेशः दिवसे पञ्चषड् घण्टा पर्यन्तं भुशुण्डिचालनस्य अभ्यासं करोति स्म। तस्य मातुलः बहु प्रसन्नः आसीत्। सः चिन्तयति स्म यत् मम भागिनेयोऽपि कदाचित् भविष्ये सैन्याधिकारी भवेदिति।

ग्रीष्मावकाशः समाप्तः। वीरेशः स्वगृहं प्रत्यागतः। तेन आगत्य सर्वप्रथमं स्व मातुः पितुः भगिन्याश्च पुरतः भुशुण्डिं चालयित्वा प्रदर्शितम्। सर्वेऽपि प्रसन्नाः जाताः। द्वितीयदिनात् वीरेशस्य विद्यालयः आरब्धः। विद्यालयात् आगत्य भुशुण्डि स्वीकृत्य सः छदौ गतः। अभ्याससमये भुशुण्ड्याः गुलिका वृक्षे उपविष्टायाः चटकायाः उदरे प्रविष्टा। चटका रक्तरञ्जिता भूमौ अपतत्। कतिचननिमेषानन्तरं चटका मृता। वीरेशः पूर्वं तु भयभीतः जातः किन्तु क्षणानन्तरं सः आत्मानं बलवान् इति अचिन्तयत्। गौरवानुभूत्या सः अधः गत्वा स्वभगिनीं वेदिकां सर्वमपि वृतान्तम् अश्रावयत्। वेदिका अवदत् यत् "एतत् अत्यन्तं दुष्टकर्म वर्तते। अग्रे यदि भवान् एतादृशं कार्यं करिष्यति चेत् अहं पितरं सूचयिष्यामि।" तदा वीरेशः क्रोधेन अवदत् यत् "भवती भुशुण्डिचालनं न जानाति अतः ईर्ष्यया एवं वदन्ती अस्ति।" द्वयोर्मध्ये कलहः जातः।

वीरेशः इदानीं प्रतिदिनं विद्यालयात् आगत्य पक्षीन् हन्ति स्म। एकस्मिन् दिने तस्य पिताजी छदौ आगत्य वीरेशस्य एतत् दुष्कार्यम्

अपश्यत्। तस्मिन्नेव समये क्रोधेन पिता भुशुण्डिम् अत्रोटयत्। वीरेशस्य पिता तं तर्जयन् अवदत् यत् "यथा अस्मासु प्राणाः भवन्ति तथैव पशुपक्षिषु भवन्ति। यथा पीडा भवतः शरीरे भवति तथैव एतेषां शरीरे अपि भवति अतः अग्रे एतादृशं कार्यं कदापि न भवेत्"।

द्वितीयदिने वीरेशः आपणात् गुलेल् आनीतवान्। सः विद्यालयस्य मध्यावकाशे गुलेल् तः प्रस्तरेण प्रतिदिनं पक्षिणः हन्ति स्म। वीरेशस्य सहपाठी अर्जुनःएकस्मिन् दिने विद्यालयस्य क्रीडाङ्गणे रक्तरञ्जितं कपोतम् अपश्यत्। सः अनुक्षणं धावन् तं कपोतं हस्ते स्वीकृत्य औषधालयं नयन् आसीत् तदा वृक्षस्य पृष्ठतः वीरेशः हसित्वा अवदत् यत्, "एषः कपोतः शीघ्रमेव मरिष्यति अतः तं त्यजतु।" अर्जुनः वीरेशस्य हस्ते गुलेल् दृष्ट्वा सर्वमपि अजानात्। अर्जुनः शीघ्रं कपोतं विद्यालयस्य प्राथमिकम् औषधालयम् अनयत्। पुनरागत्य वीरेशम् अकथयत् यत् "निर्दोषान् पक्षीन् भवान् स्वमनोरञ्जनार्थं हन्ति। यदि भवन्तं कोऽपि आनन्दार्थं ताडयेत् चेत् भवतः का दुर्गतिः भवेत् ? एतत् महत् पापं वर्तते। एतस्य फलं भवान् निश्चयेन प्राप्स्यति तदेव भवान् तेषां पीडाम् अनुभविष्यति। अहम् इदानीमेव गत्वा प्रधानाचार्यं सर्वं सूचयामि।" अर्जुनस्य भापनं श्रुत्वा वीरेशः क्रोधेन तस्योपरि प्रस्तरं प्रक्षिप्य वेगेन विद्यालयात् बहिः अधावत् तदेव एकेन स्कूटरयानेन तस्य घट्टनं जातम्। शिरसः प्रवाहमानां रक्तधारां दृष्ट्वा वीरेशः अमूर्च्छत्।

सायंकाले चेतनावस्थायां चिकित्सालये वेदिका वीरेशम् असूचयत् यत् ''भवतः मित्रम् अर्जुनः अत्र भवन्तम् अनयत् गृहे दूरवाण्या असूचयत् च। सर्वं ज्ञात्वा वीरेशः ग्लानिम् अनुभूय सर्वेभ्यः क्षमाम् अयाचत्। अद्य वीरेशः मनसि दृढसङ्कल्पं अकरोत् यत् जीवने कदापि निर्दोषजीवान् न पीडयिष्यामि इति।

उक्तमपि वर्तते -

"परस्मिन्बन्धुवर्गे वा, मित्रे द्वेष्ये रिपौ तथा।
आत्मवद्वर्तितव्यं हि दयैषा परिकीर्तिता।।"

(१३)

आपदर्थे धनं रक्षेद्

प्रियंवदा अनघा च बाल्यकालात् सख्यौ आस्ताम्। द्वयोः परिवारयोः आर्थिकस्थितिः मध्यमा आसीत्। प्रियंवदा तु मितव्ययं करोति स्म किन्तु अनघा बहु प्रदर्शनप्रिया आसीत्। सा अन्यासु सखीषु स्वप्रभावं जनयितुं निरर्थकं धनव्ययं करोति स्म। पित्रा प्रतिमासे यावत् धनं दीयते स्म तस्मात् एकं भागं प्रियंवदा वित्तकोषे स्व लेखायां स्थापयति स्म किन्तु अनघा तु सर्वमपि व्ययं करोति स्म। प्रियंवदा सर्वदा अनघा वदति स्म यत् आवश्यकतायाः अधिकः व्ययः कुत्रत्या बुद्धिमत्ता अस्ति ? आपत्कालाय किञ्चित् धनं सर्वदा संरक्षणीयं किन्तु अनघा विहस्य वदति स्म यत् पिता प्रतिमासं तु धनं ददाति तर्हि किमर्थं संरक्षणीयम्।

प्रियंवदा चिन्तयति स्म यत् कदापि तु अनघा धनसंरक्षणस्य महत्त्वं ज्ञास्यति एव। एकस्मिन् दिने अनघायाः माता स्नानागारे अपतत् तस्याः हस्तपादयोः अस्थिभङ्गः जातः। मातुः उपचारे बहुधनं व्ययम् अभवत्। सप्ताहाभ्यन्तरे अनघायाः द्वादशीकक्षायाः परीक्षाऽपि आरब्धा। गृहकार्यं कुर्वत्या तया परीक्षा दत्ता।

जूनमासान्ते अनघायाः परीक्षाफलं विद्यालयेन घोषितम्। अनघा प्रियंवदा च द्वे अपि प्रथमश्रेण्याम् उत्तीर्णे जाते। अनघा शीघ्रं स्वगृहम् आगत्य स्वमातरं परीक्षाफलम् असूचयत्। माता अतीवप्रसन्ना जाता। अनघायाः पिता तु तस्याः भ्रातुः चिकित्सामहाविद्यालयस्य शुल्कं दातुं गतः आसीत्।

रात्रौ यदा पिता प्रत्यागतः तदा अनघा हर्षेण स्वपितरं अङ्गपत्रं दर्शयितुं अगच्छत्। यद्यपि पिता प्रसन्नः आसीत् तथापि पिता चिन्तितः अस्ति इति अनघा अवेत्।

प्रातः काले प्रियंवदा महाविद्यालये प्रवेशार्थम् अनघायै दूरवाणीम् अकरोत्। अनघा पितुः आज्ञां स्वीकर्तुम् अगच्छत् तदा पित्रा शान्तभावेनोक्तं यत्, ''इदानीम् अस्माकं आर्थिक स्थितिः सुदृढा नास्ति अतः महाविद्यालये भवत्याः प्रवेशं कारयितुं न शक्यते। भवती स्वाध्यायिछात्रात्वेन परीक्षां ददातु इति। ''

एतत् श्रुत्वा अनघा अव्यथत। दूरवाण्या प्रत्युत्तरं न प्राप्य प्रियंवदा सायंकाले अनघायाः गृहम् आगता। रूदतीम् अनङ्गाा संदृश्य सा सर्वमपि अपृच्छत्।

सर्वं विज्ञाय प्रियंवदा अनघाम् अकथयत् यत् "भवती चिन्तां मा कुरु। अहं तु बाल्यकालात् वित्तकोषे धनं स्थापयन्ती अस्मि। भवती मत्तः ऋणरूपेण धनं स्वीकृत्य महाविद्यालये प्रवेशं प्राप्नोतु। शनैः शनैः मम धनं प्रत्यर्पयतु। एवम् एकैकस्य पणस्य सञ्चयनात् एव कस्यचित् उत्तमस्य कार्यस्य कृते भवत्याः साहाय्यं शक्यम् अभवत्।"

अनघा स्वपितरं प्रियंवदायाः कथनानुसारम् अपृच्छत्। अनघायाः पित्रा उक्तं यत्, "अहं प्रसन्नोऽस्मि यत् प्रियंवदा इव उत्तमा बालिका भवत्याः सखी अस्ति। प्रियंवदायाः ऋणं स्वीकर्तुम् अहं तदेव अनुमतिं दास्यामि यदा भवती अद्य आरभ्य स्वयमपि वित्तकोषे धनं स्थापयिष्यति अथ च निरर्थकम् अपव्ययं नैव करिष्यति।"

अनघा स्वपित्रे वचनम् अददात्। प्रियंवदा अपि प्रसन्ना जाता। अनघाया अद्य धनसंरक्षणस्य महत्त्वं ज्ञातम्। वयमपि अपव्ययात् आत्मानं रक्षेम। उक्तमपि वर्तते यत् -

"अर्थो रक्षति रक्षितः"।

(१४)

बालवीरः

अमितस्य पितामही प्रतिदिनं रात्रौ शयनसमये अमितं वीराणां कथां श्रावयति स्म। बाल्यकालादेव वीराणां कथां श्रुत्वा श्रुत्वा अमितस्यापि वीरस्वभावः जायमानः आसीत्। अमितः विद्यालयेऽपि अनुचितकार्यस्य सर्वदा विरोधं करोति स्म।

विद्यालये वार्षिकोत्सवस्य सज्जता चलति स्म। अवकाशानन्तरं विद्यालये केवलं ते एव छात्राः अभ्यासं कुर्वन्तः आसन् ये वार्षिकोत्सवे विविधगतिविधिषु भागं स्वीकृतवन्तः आसन्। अमितेन हॉकीक्रीडायां भागः गृहीतः आसीत् अतः सः क्रीडाङ्गणे मित्रैः सह अभ्यासरतः आसीत्। विद्यालयस्य वातानुकूलिते सभागारे सांस्कृतिककार्यक्रमाणाम् अभ्यासः जायते स्म।

किञ्चित्कालानन्तरम् अमितः विद्यालयस्य आरक्षकस्य चीत्कारम् अशृणोत्। सः धावन् वदन् आसीत्। यत् सभागारस्य द्वारे एवं निकटसंयोगकारणेन विद्युतः तन्त्रीषु अग्निसंयोगः अस्ति। न्यूनातिन्यूनं शतं जनाः अन्तः सन्ति। तेन शीघ्रम् अग्निशमनकार्यालये दूरवाणी कृता किन्तु विद्यालयस्तु नगरात् बहु दूरे आसीत्।

क्रीडाङ्गणे ये बालकाः आसन् तेऽपि भयभीताः जाताः। अमितः स्वकरवस्त्रं नासिकायां गैसप्रतिरोधकमिव बद्धवा विद्यालयम् अविशत्। सर्वप्रथमं सः विद्युतः मुख्यपिञ्जम् अरुणत्। क्रीडाङ्गणम् आगत्य स्वमित्राणि अवदत् यत् शीघ्रं स्वस्य हॉकीदण्डेन सभागारस्य वातायनानां काचानि त्रोटयन्तु येन सभागारस्य धूमः बहिः निःसरेत्। पूर्वं तु तस्य मित्राणि अबिभयुः किन्तु अमितस्य शौर्यं दृष्ट्वा तेऽपि काचानि त्रोटितवन्तः।

अमितः स्वप्राणानां रक्षणम् अविचिन्त्य सभागारं प्राविशत्। छात्राः

धूमात् संज्ञाहीनाः जायमानाः आसन्। अमितः स्वमित्रैः सह मिलित्वा तान् वातायनात् बहिः निष्कासयितुम् आरभत्। शीघ्रमेव अग्निशमनयानमपि समागतम्। ते कर्मचारिणः शीघ्रम् अग्निं नियन्त्रणाधीनम् अकुर्वन्।

सर्वे जनाः अमितस्य प्रशंसाम् अकुर्वन् यतोहि यदि समयेन अमितः रक्षां न अकरिष्यत् तर्हि सम्पूर्णभवनम् अग्नेः वशम् आगमिष्यत्, छात्राणां शिक्षकाणाञ्च मृत्युः अपि अभविष्यत्।

विद्यालयस्य प्रधानाचार्यः सर्वं विज्ञाय अवदत् यत् न केवलम् अमितेन वीरतापूर्णं कार्यं कृतम् अपितु सः स्वमित्राणि अपि प्रेरितवान्। अतः अमितं वयं 'बालवीरः' इति पुरस्कारेण अलङ्कुर्मः। वीराः एव समाजस्य पथप्रदर्शकाः भवन्ति।

उक्तमपि वर्तते –

"विदारयति यत्कर्म, तपसा च विराजते।
तपो वीर्येण युक्तश्च तस्माद्वीर इति स्मृतः।।"

(१५)

गुरवे नमः

बहुदिनेभ्यः शिवगुरुः उद्योगं प्राप्तुं प्रयासरतः आसीत्। अद्य सः नगरस्य एकस्मिन् लघुविद्यालये साक्षात्कारार्थम् अगच्छत्। विद्यालयस्य द्वारे एव सः उभाभ्यां पादाभ्यां खञ्जम् एकं बालकम् अपश्यत्। त्वरायां सः विद्यालयस्य अन्तः गतः किन्तु तस्य बालकस्य विषये एव चिन्तयन् आसीत् यतोऽङ्गहि स्वभावेन सः अतिदयालुः आसीत्।

साक्षात्कारे सः सफलः जातः। महता परिश्रमेण सः वृत्तिम् अलभत्। विद्यालयात् बहिः आगत्य सः पुनः तमेव बालकम् अपश्यत्। सः पञ्चरूप्यकाणि तस्य बालकस्य हस्ते न्यदधात्। रूप्यकाणि प्रत्यर्पयन् सः बालकः अतीव दृढतया आत्मविश्वासेन च अवदत्, "महोदय ! मम नाम वसुः अहं भिक्षां न याचे। एकवर्षं पूर्वम् अहमपि विद्यालये पठामि स्म। मम पिता श्रमिकः आसीत्। नगरे एकं नवीनं भवनं निर्मीयते स्म। मम पिता अपि तत्र कार्यरतः आसीत्। रात्रौ तस्मिन्नेव भवने मम परिवारः शयानः आसीत्। अकस्मात् निर्माणाधीनस्य भवनस्य छदिः अपतत्। अनेके श्रमजीविनः तदधः निष्पेषिताः अजायन्त। मम पितरौ तस्यां दुर्घटनायां दिवंगतौ, अहं विकलाङ्गः जातः। यदि भवान् सहायतामेव कर्तुं वाञ्छति तर्हि भवतः विद्यालये मम प्रवेशं कारयतु। अहं पठितुम् इच्छामि।"

शिवगुरुः वसोः उत्तरेण आत्मविश्वासेन च प्रभावितः जातः। सः स्वस्य विद्यालयस्य प्रधानाचार्यं वसोः प्रवेशार्थं न्यवेदयत्। स्वस्य वेतनात् वसोः शुल्कदानाय व्यवस्थां कृत्वा तं विद्यालये छात्रावासे च प्रावेशयत्।

शिवगुरुः यदा सायंकाले स्वगृहं गत्वा यदा स्वपत्नीम् वसोः वृतान्तम् अश्रावयत् तदा सा चिन्तिता भूत्वा अवदत् यत् कष्टेन तु भवता वृत्तिः

लब्धा वर्तते, वेतनमपि अल्पमेव अस्ति। आवयोः अपि एका पुत्री वर्तते तर्हि एकस्य अन्यस्य बालकस्य उत्तरदायित्वं निर्वोढुं भवान् कथं शक्ष्यति? शिवगुरुः अवदत् यत् अहं वृत्तिहीनः आसं चेदपि अस्माकं गृहकार्यं तु चलदेव आसीत् इदानीं तु उद्योगः अपि वर्तते। कदाचित् तस्य बालकस्य भाग्यादेव अहं वृत्तिम अलभे अतः भवती चिन्तां मा कुरु मम पूर्णम् वेतनम् अस्माकं वर्तमानजीवनस्य आवश्यकतापूर्त्यै वर्तते किन्तु एकः लघ्वांशः सम्पूर्ण जीवनस्य सन्तोषाय भवेदिति मम निर्णयः अस्ति। पत्न्या अपि शिवगुरोः निर्णयः अङ्गीकृतः।

स्वस्य वेतनराशेः स्वल्पं धनं नियमेन शिवगुरुः वसवे व्ययार्थं ददाति स्म। मितव्ययितया निष्ठया परिश्रमेण च वसुः अध्ययने रतः आसीत्। वार्षिकपरीक्षायां सर्वाधिकान् अङ्कान् लब्ध्वा वसुः छात्रवृत्तिं प्राप्नोत्। शिवगुरुः अतीव प्रसन्नः जातः।

द्वादशीकक्षामुत्तीर्य शासनस्य साहाय्येन वसुः महाविद्यालये प्रविष्टः। वसोः आदर्शपुरुषः शिवगुरुः एव आसीत् अतः सोऽपि अध्यापकः भवितुमेव ऐच्छत्। स्नातकपरीक्षामुत्तीर्य सः अध्यापनस्य उद्योगं प्राप्नोत्। वसुः एतां शुभसूचनां श्रावयितुं शिवगुरोः विद्यालयं यदा आगतः तदा तेन तस्य अस्वास्थ्यस्य सूचना प्राप्ता। सः विद्यालयात् शिवगुरोः गृहम् अयात्।

यदा वसुः स्व गुरोः गृहं प्राप्नोत् तस्मात् प्रागेव सः दिवंगतः आसीत्। दुःखितः वसुः प्रत्यागच्छत्। मासान्ते सः जीवने प्रथमवारं वेतनम् अलभत्। तदा आरभ्य वसुः प्रतिमासं स्वस्य वेतनस्य अर्द्धांशं गुरोः गृहं प्रेषयितम् आरभत्। वसुना चिन्तितं यत् "स्व गुरोः ऋणात् मुक्तः भवितुं न शक्नोमि किन्तु स्वस्य दायित्वं निर्वोढुं प्रयासं करोमि।"

वसुः सम्पूर्णजीवने स्वगुरुं प्रति कृतज्ञताज्ञापनम् अकरोत्।

सोऽपि स्वगुरुः इव कार्यं कर्तुं प्रयासरतः जातः। सत्यमेवोच्यते-

"शिष्याणां शुभचित्तशुद्धिजनकः संसर्गमात्रेण यः।
सोऽन्यांस्तारयति स्वयं च तरति स्वार्थं विना
सद्गुरुः।।"

(१६)

क्षमयेदं धृतं जगत्

आनन्दः पवनश्च प्रतिवेशिनौ आस्ताम्। आनन्दः सर्वदा अत्यन्तं प्रेम्णा भाषते स्म किन्तु पवनः बाल्यकालादेव अत्युधण्डः आसीत्। एकस्मिन्नेव विद्यालये अष्टमी कक्षायां द्वौ पठन्तौ आस्ताम्। तयोः परिवारजनेषु परस्परं स्नेहसम्बन्धः आसीत् किन्तु पवनः कदापि आनन्देन सह मित्रतां कर्तुं न ऐच्छत्। सर्वे जनाः आनन्दस्य प्रशंसां कुर्वन्ति स्म अतः पवनः तम् ईर्ष्यति स्म। पवनः सर्वदा आनन्दं पीडयितुम अवसरं पश्यति स्म।

एकस्मिन् दिने पवनः स्वस्य शिक्षकस्य पुस्तकं चोरयित्वा आनन्दस्य स्यूते अस्थापयत्। शिक्षकः क्रुध्यन् सर्वान् अपृच्छत्। प्रत्युत्तरं न प्राप्य सः सर्वेषां स्यूतम् अपश्यत्। आनन्दस्य स्यूते पुस्तकं संदृश्य तं सर्वेषां पुरतः बहु अतर्जयत्। पवनः अद्य बहु प्रसन्नः सन्तुष्टश्चासीत्। गृहं गत्वा सः सर्वान् विहस्य विद्यालयस्य वृतान्तम् अश्रावयत्। यावत् शक्यते स्म तावत् आनन्दस्य अपमाननम् अकरोत्।

आनन्दः व्यथते स्म। आनन्दस्य माता स्वपुत्रम् चौर्यस्य विषये अपृच्छत् तदा आनन्देन उक्तं यत् ''भोजनावकाशे यदा सर्वे छात्राः बहिः आसन् तदा केनापि मम स्यूते शिक्षकस्य पुस्तकं स्थापितं स्यात्। तस्मिन् विषये अहं किमपि न जानामि स्म अतः शिक्षकस्य प्रश्ने सत्यपि अहं किमपि न अवदम्। माता आनन्दम् आलिङ्ग्य अवदत् अहं भवतः कथने विश्वसिमि। सर्वेऽपि स्व कर्मणां फलानि प्राप्नुवन्त्येव अतः यदि भवता एतत् कार्यं न कृतं चेत् चिन्ता मास्तु, कृतं चेत् अग्रे न भवेत्।

शनैःशनैः आनन्दः एतां घटनां व्यस्मरत्। विद्यालयात् सर्वेऽपि बालकाः नर्मदानदीं द्रष्टुम् अगच्छन्। शिक्षकः सर्वान् नद्याः विषये

पाठयन् आसीत्। पवनः अवसरं प्राप्य नद्याः समीपम् अगच्छत्। किञ्चित् जले प्रवेष्टुं तस्य इच्छा अजायत। सः तथैव अकरोत् सः बहु आनन्दितः आसीत्।

अकस्मात् सर्वे बालकाः कस्यचित् चीत्कारम् अशृण्वन्। आनन्दः अवगतवान् यत् अवश्यं हि कश्चित् जनः नद्यां निमज्जन् अस्ति। शिक्षकेन दृष्टं यत् छात्रेषु पवनः नास्ति। सर्वेऽपि चिन्तिताः चीत्कारस्य दिशि धावन् अगच्छन्। शिक्षकः तरणं न जानाति स्म अतः सः साहाय्यार्थम् अन्यान् आह्वयन् आसीत्। अहं तरणं जानामि इति सूचयन् आनन्दः त्वरितमेव स्ववस्त्राणि अवतार्य जले उत्प्लुतवान्।

आनन्दः अवगाहनं कृत्वा पवनं बहिः आनयत्। पवनः संज्ञाशून्यः जातः आसीत्। आनन्दस्यापि श्वासाः अवरुद्धाः इव आसन्। शिक्षकः शीघ्रं समीपस्थं चिकित्सालयं बालौ अनयत्। शीघ्रमेव द्वौ स्वस्थौ जातौ किन्तु निमज्जनेन मरणं विचिन्त्य पवनः इदानीमपि भयभीतः आसीत्। पवनस्य मित्राणि यदा तं सूचितवन्तः यत् आनन्दः भवन्तम् अत्रायत् तदा पवनः अति लज्जितः जातः सः आनन्दात् क्षमां अयाचत् तदा सर्वे क्षमायाचनायाः कारणम् अपृच्छन्। पवनः सर्वेषां पुरतः स्वस्य शिक्षकादपि क्षमाम् अनुयाच्य पुस्तकस्य चौर्यस्य विषये अवदत् यत् तत् निकृष्टकार्यम् मया एव कृतमासीत्।

शिक्षकेन अवदत् यत् यद्यपि भवता अनुचितकार्यं कृतं किन्तु इदानीं स्वस्य त्रुटिः अनुभूता अतः अहं भवन्तं क्षाम्यामि, किन्तु आनन्दादपि भवता क्षमायाचना अवश्यमेव करणीया। त्वरितमेव आनन्दः स्वयमेव अवदत् यत् अयं तु मम शैशवकालात् मित्रं वर्तते, एतस्य कथनात् पूर्वमेव अहम् एतं क्षाम्यामि।

स्वस्य अश्रूणि विरुध्य पवनः अकथयत् यत् अहं तु सर्वदा

प्रतिकारभावनया भवन्तम् ईर्ष्यामि स्म किन्तु भवता सर्वदा मया सह मित्रवदेव आचरितम्। भवान् मदपेक्षया श्रेष्ठः इति सत्यमेव। शिक्षकः प्रसन्नतया अवदत् यत् सर्वेऽपि मानवाः जीवने त्रुटीन् कुर्वन्त्येव किन्तु तान् संक्षम्य एव समाजः अग्रेसरति अन्यथा प्रतिकारभावनायाः कदापि नाशः न भवति, अतः सर्वेऽपि जीवने क्षमाशीलाः भवन्तु।

सत्यमेवोच्यते यत् -

"क्षमा शस्त्रं करे यस्य, दुर्जनः किं करिष्यति,
अतृणे पतितो वह्निः, स्वयमेवोपशाम्यति।।"
"क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा,
क्षमा वशीकृतिर्लोके, क्षमया किन्न साध्यते।।"

(१७)

आज्ञापालनम्

दिवाकरस्य परिवारः तीर्थदर्शनार्थं गच्छन् आसीत्। दिवाकरः यद्यपि उत्तमः बालकः आसीत् तथापि सः यदा कदा ज्येष्ठानाम् आज्ञां न पालयति स्म।

दिवाकरः दशवर्षीयः बालकः आसीत् प्रथमवारं रेलयानेन गच्छन् आसीत् अतः रेलयानात् अवतरणं मास्तु इति दिवाकरस्य मात्रा सूचितम् आसीत् किन्तु यदा-यदा यानं तिष्ठति स्म दिवाकरस्य मनः यानात् अवतरितुम् इच्छति स्म।

रात्रौ यदा सर्वे गृहजनाः अस्वपन् तदा दिवाकरः रेलयानस्य स्थगनाय प्रतीक्षां कुर्वन्नासीत्। यदा रेलयानं स्थगितम् तदा दिवाकरः शीघ्रं यानात् अवतीर्य इतस्ततः भ्रमन् आसीत्। तस्य कोशे रूप्यकद्वयम् आसीत् सः चाकलेहं क्रेतुम् ऐच्छत्। सः चाकलेहं क्रेतुम अगच्छत् सः आत्मानं ज्येष्ठ इव चिन्तयन् आसीत्। दिवाकरः चाकलेहं स्वीकुर्वन्नैव आसीत् तावत् रेलयानं प्रस्थितम्। अनभ्यासात् दिवाकरः चलिते याने आरोढुं न अशक्नोत्। दिवाकरः भयेन रोदनम् आरभत। एकः युवकः तस्य समीपं गत्वा तं सर्वम् अपृच्छत्। सर्वं विज्ञाय दिवाकरम् अवदत् यत् प्रातः काले भवन्तं स्वगृहं प्रापयामि तावत् मम गृहे वसतु इति।

दिवाकरस्य गृहे केवलं तस्य पितामही आसीत् अन्ये तु सर्वे गृहजनाः रेलयाने एव आसन्। तेन युवकेन दिवाकरस्य गृहस्य दूरभाषाक्रमाङ्कं स्वीकृत्य तस्य गृहे सूचना दत्ता यत् एकलक्षरूप्यकाणि यदा दीयते तदा स्वपुत्रं स्वीकर्तुं शक्यते इति। एतत् श्रुत्वा दिवाकरस्य पितामही हृदयाङ्घातेन आक्रान्ता अभूत्। कर्मकर्या पितामही चिकित्सालयं नीता।

रेलयाने प्रभाते यदा गृहजनाः दिवाकरं न अपश्यन् तदा तम् अन्वेष्टुम इतस्ततः अधावन्। सर्वेषु सम्भावितेषु स्थानेषु पृच्छानुपृच्छा कृता, परन्तु किमपि न ज्ञातम्। दिवाकरस्य माता कारुण्येन विलपन्ती आसीत्।

तस्मिन्नेव समये दिवाकरस्य पित्रे कर्मकरी गृहात् दूरवाणी कृत्वा मातुः अस्वास्थ्यस्य विषये असूचयत्। तस्मिन्नेव रेलस्थानके आरक्षकस्थाने दिवाकरस्य पित्रा सूचितं यत् तेषां पुत्रः लुप्तः इति। सर्वे ततः एव स्वगृहं प्रत्यागच्छन्। स्वस्य गृहनगरस्य आरक्षकस्थानेऽपि दिवाकर विषये पित्रा सूचितम्।

चेतनावस्थायां पितामह्या दूरवाण्याः वार्ताविषये सूचितम्। त्वरितमेव आरक्षकैः दूरभाष कार्यालयात् तस्य युवकस्य गृहस्थितिः ज्ञाता। द्वितीयदिने प्रातः काले एव तस्य युवकस्य गृहात् दिवाकरः लब्धः। आरक्षकैः सः युवकः गृहीतः।

दिवाकरः स्वपितरं दृष्ट्वा बहु अरोदीत् मातुः वचनस्य अवज्ञायाः कारणात् सर्वे जनाः कथं पीडिताः जाताः एतत् सर्वम् अनुभूय दिवाकरः अद्य मनसि दृढसङ्कल्पम् अकरोत् यत् सर्वदा ज्येष्ठानाम् आज्ञा पालनीया।

दिवाकरः स्वपितरम् अवदत् यत् सर्वदा पितामही मां ज्येष्ठानाम् आज्ञां पालयितुम् आदिशत् किन्तु मया नाङ्गीकृतम् अतः अद्य एतावत् कष्टम् अनुभूतम्, किन्तु अद्य अहं वचनं ददामि यत् जीवने अग्रे कदापि एतादृशीं त्रुटिं नैव करिष्यामि। पित्रा मन्दं हसन् उक्तम्–

"या मतिर्जायते पश्चात् सा यदि प्रथमं भवेत्।
न विनश्येत्तदा कार्यं, न हसेत्कोऽपि दुर्जनः।।"

(१८)

निर्भयता

उमाकान्तः केशवः आपटे एकस्मिन् विद्यालये शिक्षकः आसीत्। आङ्ग्लाः अस्माकं देशे साधिकारं विद्यमानाः आसन् अतः विद्यालये राष्ट्रभक्त्याः पाठनं तु असम्भवमेव आसीत् किन्तु उमाकान्तः निर्भयेन छात्रान् स्वदेशस्य स्थितिं बोधयित्वा स्वछात्रेषु राष्ट्रभक्तिं जनयितुं यतते स्म।

उमाकान्तस्य आत्मीयव्यवहारः भिन्नशिक्षण विधिश्च छात्रेषु लोकप्रियः जायमानः आसीत्। उमाकान्तस्य सहशिक्षकाः उमाकान्तम् ईर्ष्यन्ति स्म। ते सर्वे प्रधानाध्यापकम् उमाकान्तस्यराष्ट्रभक्त्याः पाठनविषये असूचयन्। प्रधानाध्यापकः उमाकान्तम् आहूय आदिशत् यत् पाठ्यक्रमे यदुल्लिखितं वर्तते तदेव पाठनीयं न तु अन्यत् किमपि। उमाकान्तः आत्मविश्वासेन अकथयत् यत् "शिक्षायाः उधेश्यमेव छात्राणां व्यक्तित्वस्य सर्वाङ्गीणविकासः वर्तते, तदर्थं जीवनस्य समाजस्य राष्ट्रस्य वास्तविकज्ञानं तेभ्यः अनिवार्यतया दातव्यम्। तथ्यानां स्मरणं शिक्षा नास्ति।" उमाकान्तस्य उत्तरं श्रुत्वा प्रधानाध्यापकः निरूत्तरः जातः।

उमाकान्तेन स्वस्य शिक्षणविद्यौ किमपि परिवर्तनं न कृतम् अपितु सः इतोऽपि अधिकेन उत्साहेन स्वकार्ये संलग्नः जातः। १९२४ ईस्वीयस्य १ अगस्तदिनाङ्के स्वस्य कक्षायां लोकमान्यतिलकस्य पुण्यतिथेः अवसरे कार्यक्रमम् आयोजितवान्। विद्यार्थिभिः उत्साहेन काव्यपाठः गीतापाठः भाषणानि च कृतानि।

ईर्ष्यया सहशिक्षकैः आङ्ग्लाधिकारिणे उमाकान्तस्य कार्यक्रमविषये सूचना प्रेषिता। शिक्षाविभागात् प्रधानाध्यापकस्य समीपं एतादृशः गतिविधीन् रोद्धुम् आदेशः प्रेषितः। भयभीतः प्रधानाध्यापकः उमाकान्तम्

आहूय तिलकस्य पुण्यतिथेः आयोजनविषये अतर्जयत्।

निर्भयेन उमाकान्तेन उक्तं यत् "भारतस्य यस्मिन् विद्यालये भारतभक्तानां नामानि स्मर्तुम् न शक्यन्ते तस्मिन् विद्यालये अहं स्वयं पाठयितुं न इच्छामि।" एतदुक्त्वा उमाकान्तः स्वस्य त्यागपत्रम् उत्पीठिकायां स्थाप्य वेगेन विद्यालयात बहिः निर्गतः।

इमं शिक्षकम् अद्य वयं बाबासाहब आपटे इति नाम्ना जानीमः येन स्वजीवनात् पाठितं यत् शिक्षकाः सर्वदा निर्भयाः स्युः इति।

(१६)

श्रद्धा

शास्त्रेषु उक्तम् अस्ति यत् "श्रद्धावान् लभते ज्ञानम्।" एतत् वचनं प्रमाणयन्ति अस्माकं देशे भूताः बहवः महापुरूषाः। तेषु महापुरुषेषु एकः आसीत् दयानन्दः।

ज्ञानपिपासुः दयानन्दः गुरोः अन्वेषणे सम्पूर्णदेशे अभ्रमत्। अन्ततः मथुरायां सः स्वस्य गुरूरूपेण विरजानन्दं प्राप्नोत्। गुरूः द्वारोद्घाटनात् प्रागेव दयानन्दं स्वस्य व्याकरणपुस्तकानि यमुनानद्यां क्षेप्तुम् आदिशत्। यानि पुस्तकानि दयानन्दाय बहु रोचन्ते स्म तान्यपि सः गुरौ श्रद्धायाः कारणात् नद्याम् अक्षिपत्। आज्ञां पालयित्वा यदा दयानन्दः पुनरागतः तदा गुरूणा द्वारमुद्घाटितम्। दयानन्देन गुरूचरणयोः आत्मसमर्पणं कृतम्।

गुरूभक्त्या सेवाभावेन श्रद्धया च दयानन्दः स्वगुरोः प्रियशिष्यः अभवत्। दयानन्दः ध्यानेन अध्ययनमपि करोति स्म। एकस्मिन् दिने अध्यापनसमये विरजानन्दःकस्माच्चित् कारणात् दयानन्दस्योपरि क्रुद्धः जातः। क्रोधेन सः दयानन्दस्य पृष्ठे मुष्टिप्रहारम् अकरोत्। मुष्टिप्रहारेण विरजानन्दस्य हस्ते वेदना आरब्धा। दयानन्दः गुरोः समीपं गत्वा विनयेन अवदत् यत् गुरूदेव! मम शरीरं तु वज्रमिव कठोरं वर्तते अतः अग्रे यदा कदापि अहं ताडनीयः तदा दण्डेन ताडयन्तु।

कतिचित् दिनानि अनन्तरं पुनः क्रोधवशात् विरजानन्दः दण्डेन दयानन्दम् अताडयत्। एकेन सहपाठिना उक्तं यत् दयानन्दः एकः महान् संन्यासी वर्तते तेन सह एतादृशः व्यवहारः न शोभते।

दयानन्दः तं मित्रम् अवदत् यत् गुरूः मां घृणया न अताडयत् अपितु यथा कुम्भकारः ताडयित्वा ताडयित्वा घटं निर्माति तथैव गुरूः मम व्यक्तित्वं निर्माति। यदा दयानन्दः स्वस्य शिष्यान् उपदिशति स्म तदा

स्वस्य गुरोः ताडनेन अङ्कितानि चिह्नानि दर्शयित्वा वदति स्म यत् एतानि चिह्नानि एव मां स्मारयन्ति यत् अद्य अहं स्वगुरोः कृपया एव एतस्मिन् स्थाने अस्मि। ज्ञानप्राप्त्यर्थं कीदृशी श्रद्धा कीदृशः च समर्पण भावः स्यात्-एतत् उपर्युक्तात् प्रसङ्गात् स्पष्टं भवति। एतादृग्भ्यः शिष्येभ्यः एवोक्तं वर्तते-

"श्रुतिस्मृतिम् विज्ञाय केवलं गुरुसेवकाः।
ते वै संन्यासिनः प्रोक्ता इतरे वेषधारिणः।।"
"न स्नानेन न मौनेन, नैवाग्निपरिचर्यया।
ब्रह्मचारी दिवं याति, स याति गुरुपूजनात्।।"

(२०)

अल्पविद्या भयङ्करी

आसीत् गङ्गातीरे शेषाचलः नामकः पर्वतप्रदेशः। तस्मिन्नेव प्रदेशे आसीत् वर्धमानमठः। तत्र ज्योतिषाचार्यः वर्धमानः स्वशिष्यान् पाठयति स्म। वर्धमानाचार्यः सर्वदा शिष्यान् बोधयति स्म यत् यावत् पूर्णज्ञानं न भवति तावत् सभायां मुखोद्घाटनं न करणीयम्। स्वस्य विद्यायाः निरर्थकप्रदर्शनं कदापि न करणीयम्। या भविष्यवाणी जनहिताय नास्ति सा नैव करणीया। विद्यायाः विक्रयः न करणीयः। वर्धमानाचार्यः सम्पूर्णदेशे प्रख्यातः आसीत् बहवः राजानः तं स्वस्य राज्ये आह्वयन् किन्तु सः कदापि धनं स्वीकृत्य कस्यापि भविष्यस्य कथनं न अकरोत्।

विक्रमपुरस्य राज्ञः सुदर्शनस्य ज्योतिषविद्यायां बहु श्रद्धा आसीत्। सः वर्धमानाचार्यम् आहूय स्वस्य युद्धानां परिणामान् पूर्वमेव ज्ञातुम इच्छति स्म किन्तु सः जानाति स्म यत् वर्धमानाचार्यः तस्य निवेदनम् नाङ्गीकरिष्यति। राज्ञा सुदर्शनेन चिन्तितं यत् वर्धमानाचार्यस्य शिष्याः अपि विद्वांसः स्युः अतः तेषु कञ्चित् शिष्यं धनस्य लोभं दत्वा स्वस्य राज्यम् आनेतुं प्रयासं करोमि।

सुदर्शनेन स्वर्णमुद्राः दत्वा एकः सैनिकःवर्धमानमठं प्रेषितः। कश्चित् शिष्य : यदा स्नानार्थं नदीम् आगच्छति स्म तदा सैनिकः शिष्यैः सह वार्तां कृत्वा तेषु कः धनं प्राप्तुम् ईहते इति ज्ञातुं यतते स्म। बहूनि दिनानि अतीतानि। गुरोः प्रभावात् कश्चिदपि शिष्यः धनलोलुपः नासीत्। एकस्मिन् दिने एकः शिष्यः सर्वज्ञः नदीं स्नातुम् आगच्छन् आसीत्। सैनिकः तं दृष्ट्वा मार्गे एकां स्वर्णमुद्रां प्रक्षिप्य वृक्षस्य पृष्ठतः तं पश्यन् आसीत्। सर्वज्ञः कमपि न दृष्ट्वा तां मुद्राम् उत्थाप्य स्ववस्त्रे अस्थापयत्। सैनिकः प्रसन्नः जातः। सर्वज्ञःचिन्तयन् आसीत् यद् भाग्यवशादेव अद्य

अहं जीवने प्रथमं वारं स्वर्णमुद्राम् अलभे। प्रसन्नतया स स्नानार्थं गतः।

स्नात्वा यदा सः बहिः आगतः तदा सैनिकः तं न्यवेदयत् यत् "अहं विक्रमपुरस्य राज्यस्य सैनिकः अस्मि। मम स्वामी राजा सुदर्शनः स्वस्य परामर्शसमूहे कञ्चित् ज्योतिषाचार्यं योक्तुम् इच्छति। भवान् तु भविष्यज्ञाता अस्ति अतः यदि एषः अवसरः भवतः कृते लाभदायकः अस्ति चेत् मया सह चलतु।"

मोदमानः सर्वज्ञः अचिन्तयत् यत् अद्य तु मम भाग्योदयः एव जातः पूर्वं स्वर्णमुद्रा प्राप्ता इदानीं राजभवनं गन्तुम् अवसरः लभते। सः त्वरितमेव सैनिकेन सह विक्रमपुरम् अयात्। सः वर्धमानाचार्यस्य शिष्यः आसीत् अतः राजभवने तस्य बहु सम्माननं जातम्।

कतिचन दिनानि अनन्तरं विक्रमपुरे केनापि राज्ञा आक्रमणः कृतः। राजा सुदर्शनः सर्वज्ञम् आहूय युद्धस्य परिणामविषये अपृच्छत्। एषा सर्वज्ञस्य प्रथमपरीक्षा आसीत्। तस्य ज्योतिषविद्यायाः पूर्णज्ञानं नासीदेव सः तु लोभवशात् अत्र आगतः आसीत्। सर्वज्ञः भयेन अवदत् यत् "हे राजन्! भवतः विजयः निश्चितः अस्ति।"

भाग्यवशात् राजा विजितः। राज्ञः सर्वज्ञे बहु विश्वासः जातः। एकः वर्षः अतीतः भाग्येन सर्वज्ञस्य सर्वाणि वचनानि सत्यानि अभवन्। सर्वज्ञस्य बहु अहङ्कारः जातः। इदानीं सः मन्त्रिपरिषदः सर्वेषु कार्येषु स्वस्य परामर्शेन व्यवधानम् उत्पादयति स्म। मन्त्रिणः सर्वज्ञस्य अल्पज्ञानविषये जानन्ति स्म किन्तु राज्ञः सर्वज्ञे अतिविश्वासात् ते सर्वज्ञस्य विरोधे किमपि वक्तुम् असमर्थाः आसन्।

सर्वज्ञस्य कारणात् राजा स्वस्य मत्या किमपि न चिन्तयति स्म राज्यस्य कोषागारः रिक्तः जायमानः आसीत्। राजा पुरूषार्थं परित्यज्य पूर्णतः भाग्यवादी जातः आसीत्। राज्यस्य हितचिन्तकाः मन्त्रिणः सर्वज्ञं

राज्यात् बहिष्कर्तुम् एकां योजनां निर्मितवन्तः। ते जानन्ति स्म यत् सर्वज्ञः अति लुब्धः अस्ति अतः वेषं परिवर्त्य एकः मन्त्री रात्रौ सर्वज्ञस्य गृहम् अगच्छत्। तेनोक्तं यत् ''अहं विक्रमपुरस्य शत्रोः राज्यात् रायगढांत् आगतोऽस्मि तत्रत्यः राजा भवते एकसहस्रस्वर्णमुद्राः प्रेषितवान् अस्ति तथा च पञ्चसहस्रस्वर्णमुद्राः प्रतिमासं दास्यति। भवान् तस्य परामर्शसमूहे सम्मिलितः भवतु। बहिः अश्वः अस्ति अन्धकारे एव भवान् रायगढं प्रति यातु"।

इदानीं पर्यन्तं सर्वज्ञस्य स्वस्य विद्यायाम् अतीवः मिथ्याभिमानः जातः आसीत्। सः अचिन्तयत् यत् "मम प्रसिद्धिः सर्वत्र अस्ति अतः एषः धनार्जनस्य उत्तम अवसरः वर्तते"। सः सहस्रस्वर्णमुद्राः स्वीकृत्य रायगढं प्रति प्रस्थितः। अन्यः कश्चित् मन्त्री राजानम् असूचयत् यत् ज्योतिषाचार्यः सर्वज्ञः वञ्चनं कृत्वा शत्रुराज्यं रायगढ़ गच्छन् अस्ति। एतद् ज्ञात्वा राजा सुदर्शनः स्वयं रायगढस्य सीमां यावत् गतः तत्रैव सर्वज्ञः गृहीतः।

द्वितीयदिवसे राजसभायां प्रधानमन्त्रिणा उक्तं यत् यः ज्योतिषाचार्यः स्वस्य भविष्यमेव न जानाति सः अन्यस्य भविष्यकथनं कथं वा कर्तुं शक्नोति? अयं न केवलं मिथ्याभाषी वर्तते अपितु राजद्रोही अपि वर्तते। क्रोधेन राजा सर्वज्ञाय मृत्युदण्डः अददात्।

कश्चन जनः वर्धमानाचार्यं सर्वज्ञस्य वृत्तान्तम् अश्रावयत्। वर्धमानाचार्यः यद्यपि स्वस्य शिष्यस्य कार्यात् लज्जितः आसीत् तथापि सर्वज्ञं त्रातुम् ऐच्छत्। वर्धमानाचार्यः स्वयं सुदर्शनस्य राजसभां गतः। आचार्यं दृष्ट्वा सुदर्शनः तस्य चरणस्पर्शम् अकरोत्। आचार्यः सर्वज्ञं मोक्तुं न्यवेदयत्। आचार्ये श्रद्धावशात् राजा सर्वज्ञम् अमुञ्चत्।

सर्वज्ञः कारागृहात् आगत्य स्वगुरोः चरणयोः अपतत्। सर्वज्ञः अद्य

डॉ. पूजा उपाध्याया

पिता - श्री वासुदेवः चतुर्वेदी

माता - श्रीमतिः कविता देवी

जन्मतिथिः- ०३.०६.१६८०

❖ शिक्षा

- पीएच्.-डी.- संस्कृते (२००७)
  (विक्रमविश्वविद्यालय :- उज्जयिनीतः)
- एम.एड.(२०१२)
  (क्षेत्रीयशिक्षा संस्थानम् - भोपालतः)

❖ उपलब्धयः

- विक्रमादित्यशोधपीठस्य कनिष्ठशोध-अध्येतावृत्तिः प्राप्ता(२०१२)
- भारतीयदार्शनिकानुसन्धानपरिषदः कनिष्ठशोध-अध्येतावृत्तिः प्राप्ता (२००४-२००६)
- विश्वविद्यालयानुदानायोगस्य राष्ट्रिय-पात्रता परीक्षा उत्तीर्णा (संस्कृते शिक्षाशास्त्रे च)

❖ स्वर्णपदकानि प्राप्तानि-

- शिक्षाशास्त्रिपरीक्षायाम् (२०११)
- एम.ए. (संस्कृते) परीक्षायाम् (२००२)
- अखिलभारतीये कालिदासमहोत्सवे अन्तर्विश्वविद्यालयसंस्कृतवादविवाद स्पध ार्यायाम् (२०००)

❖ इन्दिरा गान्धिः राष्ट्रियसेवायोजनापुरस्कारः प्राप्तः (१६६६-२०००)

❖ लेखनं सम्पादनकार्यञ्च

- मध्यप्रदेशस्य राज्य-शैक्षिकानुसन्धानप्रशिक्षणपरिषदः षष्ठसप्तमवर्गयोः संस्कृतपुस्तकयोः, दूरस्थशिक्षायां डी.एड. पाठ्यक्रमस्य द्वितीयवर्षस्य पुस्तके च पाठाः लिखिताः (२००६)
- मध्यप्रदेशस्य राज्यशिक्षाकेन्द्रस्य शिक्षकप्रशिक्षण सन्दर्शिकायाः सम्पादनं कृतम्।
- विभिन्नासु पत्रपत्रिकासु शोधपत्राणि आलेखाश्च प्रकाशिताः।

आवास :- सीनियर HIG - २४६, कटाराहिल्स,भोपालम्, मध्यप्रदेशः, ४६२०४३

दूरभाषक्रमाङ्क : - ०७५५ - २४८०३१४



ISBN ₹
9789381160800 00040

मूल्यम् - ₹ ४०/-